आ० प० कुरुताम् कुर्वाताम् कुर्वताम् । कुरुष्व कुर्वाथाम् कुरुध्वम् । करवै करवावहै करवामहै ।

विधिलिङ् ।

कृ+उ+यात् = कर्+उ+यात् ।
= कुरु+यात् । अत उत्० – ॥ ६ । ४ । ११० ॥
= कुर्यात् । The final उ is elided – See below (iv)

(iv) ये च ॥ ६ । ४ । १०९ ॥

Fully stated, करोतेः उतः ये च नित्यं लोपः ।

The final उ of the base of the root कृ ending in उ is always elided before an ending beginning with य्.

प० प० कुर्यात् कुर्याताम् कुर्युः । कुर्याः कुर्यातम् कुर्यात । कुर्याम् कुर्याव कुर्याम ।

आ० प० कुर्वीत कुर्वीयाताम् कुर्वीरन् । कुर्वीथाः कुर्वीयाथाम् कुर्वीध्वम् । कुर्वीय कुर्वीवहि कुर्वीमहि ।

In the passive voice –

लट – कृ+यक्+ते = क्रि+य+ते । ऋ is replaced by रि – रिङ्श० – ॥ ७ । ४ । २८ ॥ (I, 13)
= क्रियते ।

लङ् – अक्रियत; लोट् – क्रियताम्; विधिलिङ् – क्रियेत ।

8. The root कृञ् with उपसर्गs.

(i) अनुपराभ्यां कृञः ॥ १ । ३ । ७९ ॥

Fully stated, अनुपराभ्यां कृञः परस्मैपदम् ।

Preceded by the उपसर्गs अनु and परा, कृञ् takes प० प० affixes only though normally a ञित् root takes आ० प० affixes if the benefit of the activity denoted by it goes to the agent – स्वरितञितः० – ॥ १ । ३ । ७२ ॥ (II, 3)

Thus, अशोकवनिका नन्दनस्य शोभाम् अनुकरोति ।
The अशोक garden imitates the beauty of the नन्दन garden.
यतिः वसु पराकरोति – The sage disregards wealth.

(ii) गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः ॥ १ । ३ । ३२ ॥

Fully stated, गन्धन – अवक्षेपण – सेवन – साहसिक्य – प्रतियत्न – प्रकथन – उपयोगेषु कृञः आत्मनेपदम् ।

In the above senses कृञ् takes आ० प० affixes, even if the benefit of the action does not go to the agent. Preceded by the उपसर्गs अनु and परा however, only प० प० affixes apply.

गन्धनम् हिंसात्मकं सूचनम् – A hostile suggestion.

श्वश्रूः स्नुषाम् उत्कुरुते – The mother-in-law makes hostile suggestions against the daughter-in-law.

अवक्षेपणम् भर्त्सनम् – Threatening or reviling

श्येनः वर्त्तिकामुदाकरुते – The hawk threatens the quail.

सेवनम् अनुवृत्तिः – Service.

भृत्यः प्रभुम् उपाकुरुते – The servant waits upon the master.

साहसिक्यम् साहसिकं कर्म – Violence, force.

अबलां प्रकुरुते – (He) voilates a helpless woman.

प्रतियत्नः गुणान्तराधानम् – Imparting a further quality.

एधोदकस्य उपस्कुरूते* – (He) makes ready fuel (improves it by drying) and water (by adding scent to it).

प्रकथनम् प्रकर्षेण कथनम् – Speaking widely.

जनापवादान् प्रकुरुते – (He) circulates widely ill reports.

उपयोगः धर्मादिप्रयोजनः विनियोगः – Using for a good purpose.

प्रपायै शतं प्रकुरूते – (He) expends a hundred for a shed for distributing water.

(iii) **अधेः प्रसहने ॥ १ । ३ । ३३ ॥**

Fully stated, अधेः कृञः प्रसहने आत्मनेपदम् ।

Preceded by अधि, कृञ् takes आ० प० affixes in the sense of प्रसहन i. e. क्षमा, pardoning or अभिभव, overcoming.

कृष्णः चेदिपतिम् अभिकुरूते – कृष्ण pardons or overcomes the king of चेदि.

(iv) **वेः शब्दकर्मणः ॥ १ । ३ । ३४ ॥**

Fully stated, वेः शब्दकर्मणः कृञः आत्मनेपदम् ।

Preceded by वि, कृञ् takes आ० प० affixes if the object is a sound or a word (शब्द).

क्रोष्टा स्वरान् विकुरुते – A jackal utters cries.

If however, the object is not शब्द –

क्रोधः चित्त विकरोति – Anger agitates the mind.

* It further takes the initial augment सुट् in the sense of प्रतियत्न. Sixth ending for the कर्म – कृञः प्रतियत्ने ॥ २ । ३ । ५३ ॥ कर्मणि शेषे षष्ठी ।

(v) अकर्मकाच्च ॥ १ । ३ । ३५ ॥

Fully stated, वेः कृञः अकर्मकात् च आत्मनेपदम् ।

Preceded by वि, कृञ् takes आ० प० affixes if it is used intransitively.

छात्राः विकुर्वते – Students are becoming restless.

9. The root कृञ् and the augment सुट्.

(i) सुट् कात्पूर्वः ॥ ६ । १ । १३५ ॥

The augment सुट् comes immediately before क् – this applies to all the following सूत्रs upto ६ । १ । १५७ ॥ inclusive.

(ii) अडभ्यासव्यवायेऽपि ॥ ६ । १ । १३६ ॥ (II, 9)

The augment सुट् should be placed before क् even when the augment अट् (as for लङ्, लुङ् and लृङ्) or a reduplication (as for लिट्) intervenes.

Thus with अट् – समस्करोत् (लङ्)

,, अभ्यास – संश्चकार (लिट् – Book IV)

(iii) संपरिभ्यां करोतौ भूषणे ॥ ६ । १ । १३७ ॥

(iv) समवाये च । ६ । १ । १३८ ॥

Fully stated, संपरिभ्यां करोतौ सुट् भूषणे समवाये च ।

Preceded by the उपसर्गs सम् and परि, the verb कृञ् takes the initial augment सुट् in the senses 'to adorn' and 'to join together'.

सम्+सुट्+करोति = सम्+स्+करोति

= सर्+स्+करोति ॥ स् is replaced by रु – र्*

= सँर्+स्+करोति ॥ ; The preceding अ is nasalised

अत्रानु० – ॥ ८ । ३ । २ ॥ (II, 4)

or संर्+स्+करोति । अनुस्वार is added after it optionally

अनुनासिकात्० – ॥ ८ । ३ । ४ ॥ (II, 4)

= सँः+स्+करोति ।

or संः+स्+करोति । र् is replaced by विसर्ग —

खरवसान० – ॥ ८ । ३ । १५ ॥ (I, 17)

= सँस्+स्+करोति

or संस्+स्+करोति । विसर्ग is replaced by स्

संपुंकानां० - ॥ See below.

= सँस्स्करोति or संस्स्करोति ।

---

* समः सुटि ॥ ८ । ३ । ५ ॥

Fully stated, समः रुः सुटि ।

The final of सम् is replaced by रु – र् (उ इत्) before the augment सुट्.

Optionally सँस्करोति or संस्करोति। The first स् is elided – समो वा लोपमेके ॥ (see below).

संपुंकानां सो वक्तव्यः ॥ (वा०)

The विसर्ग replacing the final of सम्, पुम् and कान् is replaced by स् before a खर् वर्ण.

Similarly पुँस्कोकिलः or पुंस्कोकिलः। काँस्कान् or कांस्कान्।

समो वा लोपमेके ॥

This is a directive in भाष्य. The final of सम् is elided before सुट् optionally.

Similarly, परिष्करोति – स् is replaced by ष् – परिनि० –॥ ८।३।७०॥ (II, 7)

(v) उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु च ॥ ६।१।१३९॥

Fully stated, उपात् करोतौ भूषणे समवाये प्रतियत्न – वैकृत – वाक्याध्याहारेषु च।

Preceded by उप, कृञ् takes the augment सुट् in certain senses.

भूषण – To adorn.

सख्यः वधूमुपस्कुर्वते – Companions decorate the bride.

समवाय – To join together, to assemble.

ब्राह्मणाः उपस्क्रियन्ताम् – Let the brahmins assemble.

प्रतियत्न – To impart an additional quality.

एधोदकस्य उपस्कुरुते – (He) makes ready the fuel and water.

वैकृत – To spoil or disfigure.

उपस्कृतं मांसम् – Spoiled meat.

वाक्याध्याहार– To supply elliptical language.

उपस्कृतं भाषते – (He) talks fully supplying elliptical language.

10. The root कृञ् with गति indeclinables.

Certain गति indeclinables are added initially to the conjugated forms of the root कृ and its derivatives. As गति they are permanently compounded with the following.

(i) ऊर्यादिच्विडाचश्च ॥ १।४।६१॥

Fully stated, ऊर्यादि – च्वि – डाचश्च क्रियायोगे गतिः।

The word ऊरी and others and bases ending in च्वि and डाच् are called गति when in composition with a verb.

ऊरी, उररी – particles implying assent.

ऊरीकृत्य, उररीकृत्य – Having assented.

(ii) **अनुकरणं चानितिपरम्** ॥ १ । ४ । ६२ ॥

Fully stated, अनितिपरम् च अनुकरणं क्रियायोगे गतिः ।

A word of imitation, not followed by इति, is also गति with a क्रिया.

खाट्कृत्य – Having made the sound खाट्.

With इति, however, – खाट् इति करोति ।

Similarly टंकृ, झंकृ etc. meaning to make a resonant sound.

Note चमत्कृ with चमत् – an interjection of surprise.

(iii) आदरानादरयोः सदसती ॥ १ । ४ । ६३ ॥

Fully stated, सदसती आदरानादरयोः क्रियायोगे गतिः ।

The particles सत् and असत् are गति in the sense of 'regard' and 'disregard' respectively with a verb – सत्कृत्य, असत्कृत्य.

(iv) **भूषणेऽलम्** ॥ १ । ४ । ६४ ॥

Fully stated, अलम् भूषणे क्रियायोगे गतिः ।

अलम् is गति in the sense 'to adorn' with a क्रिया – अलंकृत्य.

(v) **पुरोऽव्ययम्** ॥ १ । ४ । ६७ ॥

Fully stated, अव्ययं पुरः क्रियायोगे गतिः ।

The indeclinable पुरस् is गति in composition with a क्रिया.

पुरस्+कृत्य = पुरर्+कृत्य । ससजुषो रुः ॥ ८ । २ । ६६ ॥ (I, 17)
= पुरः+कृत्य । खरव० — ॥ ८ । ३ । १५ ॥ (I, 17)
= पुरस्कृत्य । विसर्ग is replaced by स्*.

(vi) **अदोऽनुपदेशे** ॥ १ । ४ । ७० ॥

Fully stated, अदः अनुपदेशे क्रियायोगे गतिः ।

The indeclinable अदस् – 'thus', 'so', not used for directing someone else, is गति when in composition with a क्रिया.

अदःकृत्य or अदᳵकृत्य – 'thus'.

But, अदः कृत्वा काण्डं गतः ।

---

* नमस्पुरसोर्गत्योः ॥ ८ । ३ । ४० ॥
The विसर्ग which replaces the finals of नमस् and पुरस् is again replaced by स् before a guttural 'कु' or labial 'पु' when they are गति.
नमस् is optionally गति by साक्षात्प्रभृतीनि च ॥ १ । ४ । ७४ ॥

(vii) तिरोऽन्तर्धौ ॥ १ । ४ । ७१ ॥

Fully stated, तिरः अन्तर्धौ गतिः क्रियायोगे ।

The indeclinable तिरस् is गति in the sense 'to disappear' when in composition with a क्रिया – तिरोभूय ।

Otherwise, तिरः भूत्वा स्थितः – Standing aside.

(viii) विभाषा कृञि ॥ १ । ४ । ७२ ॥

With कृञ् however it is गति optionally – तिरः कृत्वा, तिरस्कृत्य ।

(ix) उपाजेऽन्वाजे ॥ १ । ४ । ७३ ॥

Fully stated, उपाजे-अन्वाजे गतिः विभाषा कृञि ।

The particles उपाजे and अन्वाजे are optionally गति with कृञ्. ।

उपाजे कृत्वा, उपाजेकृत्य, अन्वाजे कृत्वा, अन्वाजेकृत्य – Having given support.

(x) साक्षात्प्रभृतीनि च ॥ १ । ४ । ७४ ॥

Fully stated, साक्षात् प्रभृतीनि च कृञि विभाषा गतिः ।

साक्षात् and others are optionally गति with कृञ्.

When they are treated as गति they are permanently compounded with the conjugated forms of the root कृञ् and its derivatives.

(xi) च्व्यर्थ इति वाच्यम् ॥ (वा०)

The sense conveyed should be that of च्वि – 'अभूततद्भावे' 'having become what it was not before'.

असाक्षात् साक्षात् सम्पद्यते तथा करोति – साक्षात्करोति or साक्षात् करोति ।

Other words in the group are लवणम्, नमस्, वशे etc.

प्रादुस् and आविस् are also included in this group. These are गति already as they belong to the ऊर्यादि group. With कृञ् they are optionally so – प्रादुष्कृत्य or प्रादुः कृत्वा; आविष्कृत्य or आविः कृत्वा ।

(xii) अनत्याधान उरसिमनसी ॥ १ । ४ । ७५ ॥

Fully stated, उरसि-मनसी अनत्याधाने कृञि विभाषा गतिः ।

The word-forms उरसि and मनसि are optionally गति with कृञ् when they are not used in the sense 'placed next to'.

उरसि कृत्वा or उरसिकृत्य – Accepting heartily.
मनसि कृत्वा or मनसिकृत्य – Bearing in mind.

In the sense of अत्याधान, however,
पाणिम् उरसि करोति – (He) places his hand on the bosom.

(xiii) **मध्ये पदे निवचने च ।। १ । ४ । ७६ ।।**

Fully stated, मध्ये पदे निवचने च अनत्याधाने कृञि विभाषा गतिः ।

Word-forms मध्ये, पदे and निवचने are optionally गति with कृञ् in the sense of अनत्याधान.

मध्ये कृत्वा or मध्येकृत्य – Making an intermediary.

पदे कृत्वा or पदेकृत्य – Overcoming.

निवचने कृत्वा or निवचनेकृत्य – Observing silence.

(xiv) **नित्यं हस्ते पाणावुपयमने ॥ १ । ४ । ७७ ॥**

Fully stated, हस्ते पाणौ उपयमने कृञि नित्यं गतिः ।

The word-forms हस्ते and पाणौ are always गति with कृञ् in the sense of marriage; according to others, also in the sense of acceptance. हस्तेकृत्य, पाणौकृत्य ।

(xv) **प्राध्वं बन्धने ।। १ । ४ । ७८ ।।**

Fully stated, प्राध्वं कृञि नित्यं गतिः बन्धने ।

The word-form प्राध्वम् is always गति in the sense of bondage before कृञ – प्राध्वंकृत्य, Having bound.

Otherwise, प्राध्वं कृत्वा शकटं गतः (He) is gone having made the carriage comfortable.

(xvi) **जीविकोपनिषदावौपम्ये ॥ १ । ४ । ७९ ॥**

Fully stated, जीविका-उपनिषदौ कृञि नित्यं गतिः औपम्ये ।

जीविका and उपनिषद् are always गति before कृञ् when used as objects of comparision.

जीविकामिव कृत्वा – जीविकाकृत्य, Treating as a means of livelihood.

उपनिषदमिव कृत्वा – उपनिषत्कृत्य, Treating as something received in secret.

Examples :

बुभुक्षितः किं न करोति पापम् ।
मकरो जले सिंहमपि निकुर्यात् ।
यादृशं कुरुते कार्यं तादृशं फलमश्नुते ।
हिंसां न प्रतिकुर्वीतेति बुद्धस्य शासनम् ।
तस्या मुखकमलं पङ्कजं तिरस्कुर्यात् किमत्र चित्रम् ।
मातुरनुकरोति कन्या पितुश्च पुत्रः ।
परस्यां संसदि कांस्कान् विप्रान् उपस्करवामहै ।
प्रबलमरातिं न विप्रकुर्यादिति नीतिः ।
नीचो वदति न कुरुते वदति न साधुः करोत्येव ।

CHAPTER V

Bases ending in Consonants (Contd.)

1. Bases ending in palatals.

a. हुतभुज् पु॰ Fire, (lit.) oblation-eater.

हुतभुज + सु = हुतभुज् । हल्ङ्याब्भ्यो॰ – ॥ ६ । १ । ६८ ॥ (II, 8)

= हुतभुग् । ज् is replaced by ग् – see below, 'चोः कुः'

or हुतभुक् । वाऽवसाने ॥ ८ । ४ । ५६ ॥ (II, 19)

चोः कुः ॥ ८ । २ । ३० ॥

Fully stated, पदस्य अन्ते झलि च चोः कुः ।

A वर्ण belonging to चु (च वर्ग) is replaced by कु (क वर्ग) followed by a झल् वर्ण (a consonant other than a nasal or a semi-vowel) or if it occurs at the end of a पद.

हुतभुग्भ्याम् – 'चोः कुः' applies as हुतभुज् is पद before भ्याम्, भिस्, भ्यस् and सु.

हुतभुज् + सुप् = हुतभुग् + सु । चोः कुः ॥ ८ । २ । ३० ॥

= हुतभुक् + सु । खरि च ॥ ८ । ४ । ५५ ॥ (II, 3)

= हुतभुक् + षु । आदेशप्र॰ – ॥ ८ । ३ । ५९ ॥ (I, 17)

= हुतभुक्षु ।

Thus, हुतभुक्-ग्, हुतभुजौ हुतभुजः । हुतभुजम् हुतभुजौ हुतभुजः । हुतभुजा हुतभुग्भ्याम् हुतभुग्भिः । हुतभुजे हुतभुग्भ्याम् हुतभुग्भ्यः । हुतभुजः हुतभुग्भ्याम् हुतभुग्भ्यः । हुतभुजः हुतभुजोः हुतभुजाम् । हुतभुजि हुतभुजोः हुतभुक्षु । हे हुतभुक्-ग् हुतभुजौ हुतभुजः ।

b. वाच् स्त्री॰ Speech.

वाक्-ग् वाचौ वाचः etc. (वाग्भ्याम्, वाक्षु)

c. असृज् नपुं॰ Blood.

असृक्-ग् असृजी असृञ्जि* etc. (असृजा, असृग्भ्याम्, असृक्षु)

2. Bases formed by the addition of क्विन्.

क्विन्प्रत्ययस्य कुः ॥ ८ । २ । ६२ ॥

Fully stated, क्विन् प्रत्ययस्य पदस्य कुः ।

The final consonant of a पद which consists of a base formed with the affix क्विन्, is replaced by कु (corresponding member of the क वर्ग)

---

* नपुंसकस्य झलचः ॥ ७ । १ । ७२ ॥ नुमागम । (I, 18)

a. घृतस्पृश् – घृतं घृतेन वा स्पृशतीति, Touching with ghee.

स्पृशोऽनुदके क्विन् ॥ ३ । २ । ५८ ॥

Fully stated, अनुदके सुपि स्पृशः धातोः क्विन् ।

Preceded by the declined form of a word other than उदक, स्पृश् takes the affix क्विन्.

घृत + स्पृश् + क्विन् = घृतस्पृश् । वेरपृक्तस्य ॥ ६ । १ । ६७ ॥ (Chap. III)

घृतस्पृश् + सु = घृतस्पृश् । हल्ङ्या० – ॥ ६ । १ । ६८ ॥

= घृतस्पृष् । श् is replaced by ष् – व्रश्चभ्रस्ज० – ॥ ८ । २ । ३६ ॥ (Ch. III)

= घृतस्पृड् । ष् is replaced by ड् – झलां० – ॥ ८ । २ । ३९ ॥ (II, 3)

= घृतस्पृग् । ड् is replaced by ग् – क्विन्प्र० – ॥ ८ । २ । ६२ ॥

or घृतस्पृक् । वाऽव० – ॥ ८ । ४ । ५६ ॥ (II, 19)

घृतस्पृक्–ग् घृतस्पृशौ घृतस्पृशः । etc. (घृतस्पृग्भ्याम्, घृतस्पृक्षु)

Similarly मन्त्रेण स्पृशतीति मन्त्रस्पृश् वि० Touching with a मन्त्र.

हृदयं स्पृशतीति हृदयस्पृश् वि० Touching the heart.

With उदक, however, उदकम् उदकेन वा स्पृशतीति उदकस्पर्शः (the affix अण्)

b. **ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च** ॥ ३ । २ । ५९ ॥

Fully stated, ऋत्विग्–दधृक्–स्रक्–दिक्–उष्णिक्–अञ्चु–युजि–क्रुञ्चां च क्विन् ।

Thus ऋतुं, ऋतौ, ऋतुप्रयुक्तो यजति इति ऋत्विज् पु० A priest.

ऋतु + यज् + क्विन् = ऋतु + यज् + वि ।

= ऋतु + इज् + वि । सम्प्रसारण by वचिस्वपि० – ॥ ६ । १ । १५ ॥ (II, 16)

= ऋत्विज् । वेर० – ॥ ६ । १ । ६७ ॥

ऋत्विक्–ग् ऋत्विजौ ऋत्विजः etc. (ऋत्विग्भ्याम, ऋत्विक्षु)

धृष्णोति इति दधृष् वि० One who dares, bold.

दधृक्–ग् दधृषौ दधृषः etc.

सृजन्ति ताम् इति स्रज् स्त्री० A wreath; a garland.

स्रक्–ग् स्रजौ स्रजः etc.

दिशन्ति ताम् इति दिश् स्त्री० A quarter, direction.

दिक्–ग् दिशौ दिशः etc.

उत्स्निह्यति इति उष्णिह् स्त्री० That which slips, name of a Vedic Metre.

उष्णिक्–ग् उष्णिहौ उष्णिहः etc.

Several words are derived from the root अञ्चु such as प्राच्, प्रत्यच् etc. Their declensions are given under उगित् प्रातिपदिक bases later.

युनक्ति इति युज् वि० One who joins; (पु०) A joiner.

The word is derived from युजिर् योगे रुधा० उ० प०

युजेरसमासे ॥ ७ । १। ७१ ॥

Fully stated, युजेः सर्वनामस्थाने नुम् असमासे ॥

The initial augment नुम् is added to युज् followed by a सर्वनामस्थान affix, provided it is not part of a compound.

युज्+सु = युन्ज्+स् ।	The augment नुम्.
= युन्ज् ।	स् is elided.
= युन् ।	ज् is elided – संयोगा० – ॥ ८ । २ । २३ ॥ (Ch. I)
= युङ् ।	न् is replaced by ङ् – क्विन्प्र० – ॥ ८ । २ । ६२ ॥

युङ् युञ्जौ युञ्जः युञ्जम् युञ्जौ ।

The rest – युजः, युजा, युग्भ्याम् etc. (युक्षु)

The above rule does not apply to युज् युज्यते समाधत्ते इति (वि० One who controls the mind, पु० a sage) which is derived from the root युज् समाधौ दिवा० आ० प० Further it has been formed with क्विप् and not क्विन्. The rule चोः कुः applies – युक्–ग् युजौ युजः etc.

For युजिर् योगे रुधा० उ० प० again there will not be the augment नुम् if it is compounded with another word.

अश्वान् युनक्ति इति अश्वयुज् वि० One who harnesses horses.

Moreover it is formed with the addition of क्विप्. The rule चोः कुः applies – अश्वयुक्–ग् अश्वयुजौ अश्वयुजः etc.

क्रुञ्चति इति क्रुञ्च् पुं० A heron, a curlew.

The word is derived from the root क्रुञ्च् भ्वा० प० प० with the affix क्विन्.

The penultimate nasal is not elided by the rule अनिदितां० – ॥ ६ । ४ । २४ ॥ as this is the authoritative form laid down by the present सूत्र.

क्रुङ् क्रुञ्चौ क्रुञ्चः etc. (क्रुङ्भ्याम्; क्रुङ्षु or क्रुङ्क्षु*)

क्रुञ्च्+सुप् = क्रुन्+सुप् ।	संयोगान्तस्य लोपः ॥ ८ । २ । २३ ॥
= क्रुङ्+सु ।	क्विन्प्रत्यय० – ॥ ८ । २ । ६२ ॥
or क्रुङ्+क्+सु ।	क् added -- see below ङणोः० – ॥
= क्रुङ्षु or क्रुङ्क्षु ।	

ङणोः कुकटुक शरि ॥ ८ । ३ । २८ ॥

A पद ending in ङ् or ण् takes optionally कुक्–क् and टुक्-ट् respectively before a शर् वर्ण (श्, ष, स्). A third alternative form according to the grammarian पौष्करसादि is क्रुङ्ख्षु.

c. Compounds with दृश् as the last member.

(i) त्यदादिषु दृशोऽनालोचने कञ् च ॥ ३ । २ । ६० ॥

Fully stated, त्यदादिषु दृशः धातोः अनालोचने क्विन् कञ् च ।

Preceded by त्यद् etc. (pronouns), the root दृश् takes the affix क्विन् and कञ् if the root does not convey the sense 'to perceive'.

त्यद्+दृश्+क्विन् = त्यद्+दृश् । वेरपृक्तस्य ॥ ६ । १ । ६७ ॥
= त्यादृश् । द् is replaced by आ - See below (iii)

With कञ् – अ (क् ञ् इत्) – त्यादृश ।

(ii) दृशेः क्सश्च वक्तव्यः । (वा०)

Alternately दृश् will take the affix क्स – स (क् इत्)

त्यद्+दृश्+क्स = त्यद्+दृश्+स ।
= त्यद्+दृष्+स । व्रश्चभ्रस्ज० – ॥ ८ । २ । ३६ ॥
= त्यद्+दृक्+स । ष् is replaced by क् See below (iv)
= त्यद्+दृक्+ष । आदेशप्रत्यय० – ॥ ८ । ३ । ५९ ॥
= त्यादृक्ष । द् is replaced by आ. (iii)

(iii) आ सर्वनाम्नः ॥ ६ । ३ । ९१ ॥

Fully stated, सर्वनाम्नः दृग्–दृश–वतुषु आ ।

The final of a pronominal base is replaced by आ followed by दृश्, दृश and वतुप्. (For वतुप् refer Chap. XIII)

श् of दृश् is replaced by ग् in the सूत्र by rules of सन्धि.

(iv) दृक्षे चेति वक्तव्यम् ॥ (वा०)

This takes place even with दृक्ष following.

(v) षढोः कः सि ॥ ८ । २ । ४१ ॥

ष् and ढ् are replaced by क् followed by स्.

त्यादृश् वि०, त्यादृश वि० (स्त्री० शी with ङीप्), त्यादृक्ष वि० (स्त्री० क्षी) Such a one as that

Similarly यादृश् वि०, यादृश वि० (स्त्री० शी), यादृक्ष वि० (स्त्री० क्षी) Like which.
तादृश्, तादृश (–शी), तादृक्ष (–क्षी) वि० Such like.
एतादृश्, एतादृश (–शी), एतादृक्ष (–क्षी) वि० Of this kind.

(vi) इदंकिमोरीश्की ॥ ६ । ३ । ९० ॥

दृक्षे चेति वक्तव्यम् ॥ (वा०)

Fully stated, इदंकिमोः दृग्दृशवतुषु दृक्षे च ईश्–की ।

The pronouns इदम् and किम् are replaced entirely by ईश्–ई (श् इत्) and की respectively before दृश्, दृश and वतुप् and also दृक्ष.

इदम्+दृश्+क्विन् = इदम्+दृश् । वेरपृक्त० – ॥ ६ । १ । ६७ ॥
= ईदृश् । इदम् is replaced by ई.

Similarly, ईदृश; ईदृक्ष ।

Thus ईदृश्, ईदृश (–शी), ईदृक्ष (–क्षी) वि० Endowed with such qualities.
कीदृश्, कीदृश (–शी), कीदृक्ष (–क्षी) वि० Of what kind.
अदस्+दृश्+क्विन् = अदस्+दृश् । वेरपृ० – ॥ ६ । १ : ६७ ॥
= अदा+दृश् । आ सर्व० – ॥ ६ । ३ । ९१ ॥
= अमूदृश् । आ is replaced by ऊ, द् by म्
अदसोऽसे० – ॥ ८ । २ । ८० ॥ (II, 20)

अमूदृश्, अमूदृश (–शी), अमूदृक्ष (–क्षी) वि० Like such a one.

Similarly, भवादृश् etc. वि० One like your honour.

For युष्मद् (more than one), अस्मद् (more than one)
युष्मादृश् etc. Like you; अस्मादृश् etc. Like us.

For युष्मद् and अस्मद् singular, however,

(vii) प्रत्ययोत्तरपदयोश्च ॥ ७ । २ । ९८ ॥

Fully stated, प्रत्ययोत्तरपदयोःच युष्मदस्मदोः मपर्यन्तस्य एकवचने त्वमौ ।

युष्मद् and अस्मद् upto म, are replaced by त्व and म respectively when followed by an affix or when part of a compound, the second member following.

युष्मद्+दृश्+क्विन् = युष्मद्+दृश् ।
= त्वद्+दृश् । युष्म is replaced by त्व.
= त्वादृश् । आ सर्व० – ॥ ६ । ३ । ९१ ॥

Thus, त्वादृश्, त्वादृश (–शी), त्वादृक्ष (–क्षी) वि० Like thee.

Similarly, मादृश् etc. वि० Like me.

समान, अन्य ।

(viii) समानान्ययोश्चेति वक्तव्यम् (वा०)

Preceded by समान and अन्य, the root दृश् takes the affix क्विन्, कञ् and क्स, provided not used in the sense 'to perceive'.

(ix) दृग्दृशवतुषु ॥ ६ । ३ । ८९ ॥

दृक्षे चेति वक्तव्यम् ॥ (वा०)

समानस्य दृग्दृशवतुषु दृक्षेः च सः ।

समान is replaced by स before दृश्, दृश, वतुप् and दृक्ष.

सदृश्, सदृश (–शी), सदृक्ष (–क्षी) वि० Reselmbing.

Similarly अन्यादृश् etc. वि० Of another kind.

Declensions.

त्यादृश् पु॰ स्त्री॰ — त्यादक्-ग्, त्यादृशौ, त्यादृशः etc. (त्यादृग्भ्याम्, त्यादृक्षु)

नपुं॰ — त्यादृक्-ग्, त्यादृशी, त्यादृंशि etc. (the rest like पुं॰)

Bases ending in अ like त्यादृश, त्यादृक्ष are declined like nominal bases ending in अ. त्यादृशी, त्यादृक्षी are declined like नदी bases.

3. Bases formed with the root नश्.

नश्यति इति नश् वि॰ Perishing (क्विप् च ॥ ३ । २ ॥ ७५ ॥ Ref. Chap. XIV)

नशेर्वा ॥ ८ । २ । ६३ ॥

Fully stated, नशेः पदस्य वा कुः ।

The final of नश् when it is a पद, is optionally replaced by a guttural (क वर्ग) Alternately श् will be replaced by ष् - व्रश्चभ्रस्ज॰—॥

नश् पुं॰ and स्त्री॰

नक्-ग् or नट्-ड् नशौ नशः etc. (नग्भ्याम् or नड्भ्याम्, नक्षु or नट्त्सु)

नपुं॰ – नक्-ग् or नट्-ड् नशी नंशि etc.

जीवस्य नाशः इति जीवनश् स्त्री॰ Destruction of life.

सम्पदादिभ्यः क्विप् ॥ (वा॰)

Words सम्पद् etc. (नश् belongs to this group) take the affix क्विप् in the feminine gender in the impersonal construction (भावे) or in a कारक relationship not indicating the agent. Here the root नश् takes क्विप् which is elided - जीवनक्-ग् or जीवनट्-ड् etc.

Examples :

यादृगध्यवसायस्तादृक् फलम् ।
यथा चित्तं तथा वाचो यथा वाचस्तथा क्रियाः ।
इह संसारे देहभाजः प्रायो दुःखभाजो भवन्ति ।
मन्त्रस्पृग् ऋत्विग् यज्ञियमश्वं समस्करोत् ।
भवादृश एतादृशमाचारं प्रतिपद्येरन्निति न श्रद्धेयम् ।
हे आर्याः प्रह्लादस्येदं हृदयस्पृगाख्यानमवहिताः शृण्वन्तु ।
पत्नी सर्वेषु कार्येषु भवेत् पत्युः किलांऽशभाक् ।
मन्त्रे तीर्थे द्विजे देवे दैवज्ञे भेषजे गुरौ ।
यादृशी भावना यस्य सिद्धिर्भवति तादृशी ॥
लौकिकानां हि साधूनामर्थं वागनुवर्तते ।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति ॥

CHAPTER VI

Roots of the क्र्यादि class.

(लट्–लङ्–लोट्–विधिलिङ्)

1. Roots belonging to the नवम गण (9th class) are known as क्र्यादि after the root डुक्रीञ् द्रव्यविनिमये which leads the group in the धातुपाठ.
क्र्यादिभ्यः श्ना ॥ ३ । १ । ८१ ॥
Fully stated, क्र्यादिभ्यः कर्तरि सार्वधातुके श्ना ।
The affix श्ना–ना (श् इत्) is added to roots of the क्र्यादि class followed by a सार्वधातुक affix which indicates the agent.

2. The affix श्ना itself is सार्वधातुक as it has the indicatory श् attached to it.

3. श्ना is not पित् – it is therefore to be treated as 'ङित्–सार्वधातुकमपित् १ । २ । ४ ॥ There will be no गुण substitution of the final इ, उ, ऋ, short or long and ऌ or of the penultimate short of the base to which it is added.

4. For लट्, लङ्, लोट् and विधिलिङ्, तिङ् affixes enumerated in Chapter I, sec. 8 apply.

5. Conjugation.

a. डुक्रीञ् द्रव्यविनिमये क्र्या० उ० प० — क्री to buy, to purchase.

लट् – क्री+श्ना+तिप् = क्रीणाति ।	न् is replaced by ण्.
क्री+श्ना+तस् = क्रीणा+तस् ।	
= क्रीणीतः ।	आ is replaced by ई as तस् is ङित् See below (i)

(i) ई हल्यघोः ॥ ६ । ४ । ११३ ॥

Fully stated, अघोः श्नाभ्यस्तयोः अङ्गस्य आतः हलि सार्वधातुके क्ङिति ई ।

The final आ of a base ending in श्ना and of a reduplicated base (other than that of the roots included in the संज्ञा 'घु'*) is replaced by ई followed by a सार्वधातुक affix beginning with a consonant provided it is कित् or ङित्.

क्री+श्ना+अन्ति = क्रीणा+अन्ति ।
= क्रीणन्ति । आ is elided See below (ii)

---

* दाधा घ्वदाप् ॥ १ । १ । २० ॥ (II, 16)

(ii) श्नाभ्यस्तयोरातः ॥ ६ । ४ । ११२ ॥

Fully stated, श्नाभ्यस्तयोः अङ्गस्य आतः सार्वधातुके क्ङिति लोपः ।

The final आ of a rootbase (अङ्ग) ending in श्ना or of a reduplicated base is elided, followed by a सार्वधातुक affix that is कित् or ङित्.

The सूत्र ई हल्यघोः ॥ ६ । ४ । ११३ ॥ (a later one) applies to such affixes beginning with a consonant. The present सूत्र therefore applies to those beginning with a vowel.

लट् । प० प० क्रीणाति क्रीणीतः क्रीणन्ति । क्रीणासि क्रीणीथः क्रीणीथ । क्रीणामि क्रीणीवः क्रीणीमः ।

आ० प० क्रीणीते क्रीणाते क्रीणते । क्रीणीषे क्रीणाथे क्रीणीध्वे । क्रीणे क्रीणीवहे क्रीणीमहे ।

लङ् । प० प० अक्रीणात् अक्रीणीताम् अक्रीणन् । अक्रीणाः अक्रीणीतम् अक्रीणीत । अक्रीणाम् अक्रीणीव अक्रीणीम ।

आ० प० अक्रीणीत अक्रीणाताम् अक्रीणत । अक्रीणीथाः अक्रीणाथाम् अक्रीणीध्वम् । अक्रीणि अक्रीणीवहि अक्रीणीमहि ।

लोट् । प० प० क्रीणातु क्रीणीताम् क्रीणन्तु । क्रीणीहि क्रीणीतम् क्रीणीत । क्रीणानि क्रीणाव क्रीणाम ।

आ० प० क्रीणीताम् क्रीणाताम् क्रीणताम् । क्रीणीष्व क्रीणाथाम् क्रीणीध्वम् । क्रीणै क्रीणावहै क्रीणामहै ।

विधि० । प० प० क्रीणीयात् क्रीणीयाताम् क्रीणीयुः । क्रीणीयाः क्रीणीयातम् क्रीणीयात । क्रीणीयाम् क्रीणीयाव क्रीणीयाम ।

आ० प० क्रीणीत क्रीणीयाताम् क्रीणीरन् । क्रीणीथाः क्रीणीयाथाम् क्रीणीध्वम् । क्रीणीय क्रीणीवहि क्रीणीमहि ।

b. अश भोजने क्र्या० प० प० अश् to eat, to enjoy.

अश्+श्ना+तिप् = अश्नाति । न् is not replaced by ञ्. See below (i)

(i) शात् ॥ ८ । ४ । ४४ ॥

Fully stated, शात् तोः श्चुः न ।

Coming after श्, a member of the dental class (त वर्ग) is not replaced by a corresponding member of the palatal class (च वर्ग).

लट् – अश्नाति अश्नीतः अश्नन्ति etc.

लङ् – आश्नात् आश्नीताम् आश्नन् etc.

लोट् – अश्नातु अश्नीताम् अश्नन्तु etc.

अशान – अश्+श्ना+हि = अश्+शानच्+हि । See below (ii)

= अश्+आन । हि is elided – अतो हेः ॥ ६ । ४ । १०५ ॥

(Ref. Chap. I)

= अशान ।

(ii) हलः श्नः शानज्झौ ॥ ३ । १ । ८३ ॥

Fully stated, हलः श्नः हौ शानच् ।

The affix श्ना is replaced by शानच् – आन (श्, च्, इत्) followed by हि (म० पु० एकवचन) for a root ending with a consonant.

विधिलिङ् – अश्नीयात् अश्नीयाताम् अश्नीयुः ।

c. क्षुभ संचलने क्र्या० प० प० क्षुभ् to shake, to agitate.

(Also दिवा० प० प०)

क्षुभ्+श्ना+तिप् = क्षुभ्+ना+ति ।

= क्षुभ्नाति । न् is not replaced by ण् – See below.

क्षुभ्नादिषु च ॥ ८ । ४ । ३९ ॥

Fully stated, क्षुभ्नादिषु च नः णः न ।

In क्षुभ्ना and the rest, न् is not replaced by ण्.

लट् – क्षुभ्नाति क्षुभ्नीतः क्षुभ्नन्ति etc.

लङ् – अक्षुभ्नात् अक्षुभ्नीताम् अक्षुभ्नन् etc.

लोट् – क्षुभ्नातु क्षुभ्नीताम् क्षुभ्नन्तु etc.*

विधि० – क्षुभ्नीयात् क्षुभ्नीयाताम् क्षुभ्नीयुः etc.

d. ज्ञा अवबोधने क्र्या० प० प० to know, to understand.

ज्ञा+श्ना+तिप् = ज्ञा+ना+ति ।

= जानाति । ज्ञाजनोर्जा ॥ ७ । ३ । ७९ ॥ (I, 2)

लट् – जानाति जानीतः जानन्ति etc.

लङ् – अजानात् अजानीताम् अजानन् etc.

लोट् – जानातु जानीताम् जानन्तु etc.

विधि० – जानीयात् जानीयाताम् जानीयुः etc.

e. बन्ध बन्धने क्र्या० प० प० बन्ध् to bind.

बन्ध्+श्ना+तिप् = बध्+ना+ति । Penultimate nasal is elided – अनिदितां हल० – ॥ ६ । ४ । २४ ॥ (I, 12)

= बध्नाति ।

लट् – बध्नाति । लङ् – अबध्नात् । लोट् – बध्नातु । विधि० – बध्नीयात् ।

f. ग्रह उपादाने क्र्या० उ० प० ग्रह् to take, to seize.

ग्रह+श्ना+तिप् = गृह् + ना + ति । सम्प्रसारण – ग्रहिज्या० – ॥ ६ । १ । १६ ॥ (I, 14)

= गृह्णाति ।

---

* The म० पु० एकव० is क्षुभाण.

श्ना is replaced by आन followed by हि. The rule क्षुभ्नादिषु च ॥ does not apply — न् is replaced by ण्.

लट् - गृह्णाति - गृह्णीते । लङ् - अगृह्णात् - अगृह्णीत ।
लोट् - गृह्णातु - गृह्णीताम् । विधि॰ - गृह्णीयात् - गृह्णीत ।

6. The प्वादि group.

(i) प्वादीनां ह्रस्वः ॥ ७ । ३ । ८० ॥

Fully stated, प्वादीनाम् अङ्गस्य शिति ह्रस्वः ।

The final vowel of the roots पू etc. are shortened followed by a शित् affix.

पूञ् पवने क्र्या॰ उ॰ प॰ पू to purify, to cleanse.

पू+श्ना+तिप् = पु+ना+ति । ऊ is shortened
= पुनाति ।
लट् - पुनाति-पुनीते । लङ् - अपुनात्-अपुनीत ।
लोट् - पुनातु-पुनीताम् । विधि॰ - पुनीयात्-पुनीत ।

Similarly, लूञ् छेदने to cut, स्तॄञ् आच्छादने to strew etc.

ज्या वयोहानौ प॰ प॰ to become old.
ज्या + श्ना + तिप् = जि+ना+ति । ग्रहिज्या॰ — ॥ ६ । १ । १६ ॥
= जी+ना+ति । इ is lengthened – See below (ii)
= जिनाति । प्वादीनां ह्रस्वः ॥

(ii) हलः ॥ ६ । ४ । २ ॥

Fully stated, हलः सम्प्रसारणस्य अङ्गस्य दीर्घः ।

The final vowel of a base, ending in a सम्प्रसारण preceded by a consonant, is lengthened.

The following roots belong to this group –

लूञ् छेदने क्र्या॰ उ॰ प॰	लू	– to cut, to severe, to reap.
स्तॄञ् आच्छादने* क्र्या॰ उ॰ प॰	स्तॄ	– to spread, to strew, to cover.
कॄञ् हिंसायाम् ,, ,,	कॄ	– to hurt, to injure, to kill.
वॄञ् वरणे** ,, ,,	वॄ	– to choose, to select.
धूञ् कम्पने‡ ,, ,,	धू	– to shake.
शॄ हिंसायाम् ,, प॰ प॰	शॄ	– to tear asunder, to injure, to kill.
पॄ पालनपूरणयोः ,, ,,	पॄ	– to fill, to blow into, to nourish, to satisfy.
दॄ विदारणे ,, ,,	दॄ	– to break asunder, to rend.

* Compare स्तृञ् आच्छादने स्वा॰ उ॰ प॰ Like this root it occurs also with the उपसर्गs आ, परि, प्र, वि and सम् in the same senses.

** Compare वृञ् वरणे स्वा॰ उ॰ प॰

‡ Compare धुञ् - धूञ कम्पने स्वा॰ उ॰ प॰; also चुरा॰ उ॰ प॰; धू विधूनने तुदा॰ प॰ प॰

जॄ वयोहानौ† ,, ,, जॄ – to become old, to perish, to be digested.
ऋ गतौ ,, ,, ऋ – to go, to move,
गॄ शब्दे ,, ,, गॄ – to call out, to invoke, to praise.
री गतिरेषणयोः ,, ,, री – to go, to move, to hurt or injure.
ली श्लेषणे§ ,, ,, ली – to stick to, to melt.
व्ली वरणे ,, ,, व्ली – to choose, to select.

7. In the passive voice all roots takes the affix यक् followed by आ० प० तिङ् affixes.*

क्री – क्रीयते। अक्रीयत। क्रीयताम्। क्रीयेत।
अश् – अश्यते। आश्यत। अश्यताम्। अश्येत।
क्षुभ् – क्षुभ्यते। अक्षुभ्यत। क्षुभ्यताम्। क्षुभ्येत।
बन्ध् – बध्यते etc.; ग्रह् – गृह्यते etc. (सम्प्रसारण)
पू – पूयते (यक् is not शित्, no shortening)
ज्या – जीयते (सम्प्रसारण, इ is lengthened by हलः ॥ ६।४।२॥)
ज्ञा – ज्ञायते (ज्ञा is not replaced by जा as यक् is not शित्)
शॄ – शीर्यते (ऋ is replaced by इर–ऋत इद्०–॥ ७।१।१००॥)
इ is lengthened – हलि च ॥ ८।२।७७॥ (I, 12)
पॄ – पूर्यते (ऋ is replaced by इर् – उदोष्ठ्य० – ॥ See below)
इ is lengthened by हलि च ॥ ८।२।७७॥

उदोष्ठ्यपूर्वस्य ॥ ७।१।१०२॥

The final vowel of a root-base ending in ऋ is replaced by उ i. e. उर् (उरण् रपरः ॥ १।१।५१॥)

8. Roots of the क्र्यादि class –

इष आभीक्ष्ण्ये प० प० इष् – to cause to move quickly, to throw, to discharge.

(Compare इष गतौ दिवा० प० प० and इष इच्छायाम् तुदा० प० प०)

कुष निष्कर्षे प० प० कुष् – to pull out, to extract.

With अनु – to drag along; to rub in the same direction; with निर् (निष्कुष्) to extract, to draw out; with प्रति – to rub in the opposit direction.

---

† Compare जृष् वयोहानौ दिवा० प० प०

§ Also दिवा० आ० प०

* With the addition of यक्, the base (अङ्ग) becomes अकारान्त; modifications given in Chap. I, Sec. 9 apply to the तिङ् affixes.

क्नूञ् शब्दे उ० प० क्नू – to sound.

डुक्रीञ् द्रव्यविनिमये उ० प०* क्री – to buy, to purchase, to redeem.

With अप – to buy; with अभि – to buy for a special purpose; with अव – to purchase, to hire, to bribe; with निस् or निर् (निष्क्री) – to buy off, to redeem; with परि† to buy, to hire, to reward; with वि – to buy and sell, to exchange for; with सम् – to buy, to purchase.

क्लिशू विबाधने प० प० क्लिश् – to torment, to molest.

(There is another root क्लिश उपतापे दिवा० आ० प०)

गॄ शब्दे प० प०‡ गॄ – to call out etc. (Compare गॄ निगरणे तुदा० प० प०)

With अनु – to join in praising, to repeat; with प्रति – to invoke; with सम् – to recite together.

ग्रन्थ संदर्भे प० प० ग्रन्थ् – to string together, to arrange, to compose.

ग्रह उपादाने उ० प० ग्रह् – to take, to seize.

With अनु – to support, to favour; with अप – to take away, to disjoin; with अव – to keep back from, to separate (as words in grammar); with आ – to persist in; with उद् – to lift up, to take out; with उप – to seize, to draw near, to take as one's ally; with नि – to restrain; with परि – to surround, to overpower; with प्र – to grasp, to accept; with प्रति – to accept, to marry; with वि – to hold apart, to quarrel; with सम् – to gather or hold to gether, to collect.

---

* परिव्यवेभ्यः क्रियः ॥ १ । ३ । १८ ॥

Preceded by परि, वि and अव, the root क्री takes आ० प० affixes.

Being ञित्, ordinarily the root will take आ० प० affixes if the क्रियाफल is कर्तृगामिन्. Preceded by these उपसर्गs however, आ० प० affixes apply even if it is not so.

† परिक्रयणे सम्प्रदानमन्यतरस्याम् ॥ १ । ४ । ४४ ॥

In a transaction of hiring or engaging for a fixed remuneration, the instrument (of the greatest utility for the activity i. e. the price of hire) is optionally treated as सम्प्रदान. Alternately it will be करण – साधकतमं करणम् ॥ १ । ४ । ४२ ॥ अल्पेन वेतनेन or अल्पाय वेतनाय भृतकान् पर्यक्रीणीत । (He) hired labourers for a low wage.

‡ अनुप्रतिगृणश्च ॥ १ । ४ । ४१ ॥

For गॄ preceded by अनु and प्रति, the agent of a previous activity becomes सम्प्रदान.

Thus होता शंसति – अनन्तरम्, अध्वर्युः होत्रे अनुगृणाति प्रतिगृणाति वा ।

ज्ञा अवबोधने प० प०* ज्ञा to know, to understand.

With अनु – to permit, to authorise; with अप‡ – to deny, to conceal; with अभि – to know, to recognise; with अव – to despise; with आ – to perceive, to ascertain.

---

* (i) अनुपसर्गाज्ज्ञ ॥ १ । ३ । ७६ ॥

Fully stated अनुपसर्गात् ज्ञः कर्त्रभिप्राये क्रियाफले आत्मनेपदम् ।

ज्ञा, not preceded by any उपसर्ग, takes आ० प० affixes if the benefit of the activity goes to the agent.

धेनुं जानीते – (He) knows (his own) cow.

(ii) विभाषोपपदेन प्रतीयमाने ॥ १ । ३ । ७७ ॥

Fully stated, उपपदेन प्रतीयमाने कर्त्रभिप्राये क्रियाफले ज्ञः विभाषा आत्मनेपदम् ।

If it is made clear with the help of an उपपद that the benefit of the activity is for the agent, ज्ञा takes आ० प० affixes optionally.

स्वां धेनुं जानीते or जानाति – (He) knows his own cow.

This option also applies to the preceding सूत्रs – स्वरितञितः कर्त्रभिप्राये क्रियाफले । ७२ । अपाद्वदः । ७३ । णिचश्च । ७४ । समुदाङ्भ्यो यमोऽग्रन्थे । ७५ । (१। ३ ।) –

स्व यज्ञं यजति or यजते । स्वं कट करोति or कुरुते ।
धनकामः न्यायम् अपवदति or अपवदते ।
स्वम् ओदनं पाचयति or पाचयते ।
स्वान् केशान् संयच्छति or संयच्छते ।

(iii) अकर्मकाच्च ॥ १ । ३ । ४५ ॥

Fully stated, अकर्मतात् च ज्ञः आत्मनेपदम् ।

ज्ञा takes आ० प० affixes when used intransitively.

सर्पिषो जानीते - (He) engages in sacrificial rite with clarified butter.

सर्पिस् takes the 6th ending by the following सूत्र –

(iv) ज्ञोऽविदर्थस्य करणे ॥ २ । ३ · ५१ ॥

Fully stated, अविदर्थस्य ज्ञः करणे शेषे षष्ठी ।

The instrument of the root ज्ञा when not used in the sense 'to know' takes the 6th ending.

‡ अपह्नवे ज्ञः ॥ १ । ३ । ४४ ॥ आत्मनेपदम् ।

ज्ञा when used in the sense 'to deny' takes आ० प० affixes.

वचनमपजानीते (He) repudiates his word.

With उप – to find out, to invent; with प्र – to discern, to learn; with प्रति* to admit, to promise; with वि – to observe, to have right knowledge; with सम् – to know well etc. The causal form is ज्ञापि – to cause to know, to teach.

With वि – to request, to beg; with आ – to direct, to order.

With certain उपसर्गs the root is मित् and then the causal form is ज्ञपि e. g. प्रज्ञपि – to sharpen; विज्ञपि – to propitiate; संज्ञपि – to exhibit etc.

पुष पुष्टौ प० प० पुष् to nourish, to rear.

(Also भ्वादि and दिवादि प० प०; पुष धारणे चुरा० उ० प०)

प्रीञ् – तर्पणे कान्तौ च उ० प० प्री – to please, to gladden, to like.

(Also प्रीञ् तर्पणे चुरा० उ० प०)

प्रुष – प्लुष स्नेहनसेवनपूरणेषु प० प० प्रुष् – प्लुष् to sprinkle, to wet, to fill.

बन्ध बन्धने प० प० बन्ध् to bind.

With अनु – to attach, to bind, to follow; with आ – to tie on, to join; with उद् – to tie up, to hang one's self; with नि – to fasten to, to join; with निस् or निर् – to insist on, to urge; with परि – to surround; with प्र – to stop, to put together, to compose; with प्रति – to interrupt; with सम् – to join.

मन्थ विलोडने प० प० मन्थ् to stir round, to agitate, to destroy.

With उद् (उन्मन्थ्) – to tear off; with निस् or निर् – to churn, to destroy etc.; with प्र – to churn, to harass; with वि – to tear to pieces, to disperse; with सम् – to pound together.

मीञ् हिंसायाम् उ० प० मी to hurt, to injure, to kill.

---

* संप्रतिभ्यामनाध्याने ॥ १ । ३ । ४६ ॥

Preceded by सम् and प्रति, 'ज्ञा' takes आ० प० affixes, not in the sense 'to remember' स्वधर्मं संजानीते – (He) knows his duty.
सहस्रं प्रतिजानीते – (He) promises a thousand.
But पतिं or पत्युः संजानाति – (She) remembers her husband. longingly.

संज्ञोऽन्यतरस्यां कर्मणि ॥ २ । ३ । २२ ॥

The object of the root ज्ञा preceded by सम् takes तृतीया optionally – पित्रा पितरं वा संजानीते – (He) knows well or lives in harmony with his father.

With प्र‡ – to annihilate.
मुष स्तेये प० प०§ मुष् to steal.
मृद क्षोदे प० प० मृद् to pound, to destroy, to rub or strike.

With अव – to crush, with आ – to mix together, with उप – to graze in passing, to destory; with वि – to grind down, with सम् – to press together etc.

युञ् बन्धने उ० प० यु to bind, to unite, to fasten.
वृङ् सम्भक्तौ आ० प० वृ to distribute, to bestow.
श्रन्थ विमोचनप्रतिहर्षयोः सन्दर्भे च । प० प० श्रन्थ् to loosen, to delight, to arrange.
श्रीञ पाके उ० प० श्री to cook, to mix.
षिञ् बन्धने उ० प० षि to bind, to tie.
स्कम्भु रोधने प० प० (सौत्र) स्कम्भ् to stop.
With वि – (विष्कम्भ)* – to support etc.
स्तम्भु रोधने प० प० (सौत्र) स्तम्भ् – to stop, to prop.
With अभि (अभिष्टम्भ्)‡ to hold up; with अव (अवस्तम्भ्)§ – to rest upon, to bar; with उद् (उत्तम्भ) † – to hold up; with परि (परिष्टम्भ्) – to prop up; with प्रति (प्रतिष्टम्भ) – to obstruct; with वि (विष्टम्भ) to obstruct, to fix; with सम् (संस्तम्भ्) – to make firm.

---

‡ हिनु मीना ॥ ८ । ४ । १५ ॥ न् is replaced by ण् – प्रमीणाति – णीते etc.

§ मुष् governs two objects – दुह्याच्पच्० – । (Ref. अकथितं च ॥ १ । ४ । ५१ ॥)

* वेः स्कभ्नातेर्नित्यम् ॥ ८ । ३ । ७७ ॥
Preceded by वि, स् of the root स्कम्भ् is always replaced by ष् – विष्कभ्नाति । This root takes श्नु optionally by स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्यः श्नुश्च ॥ ३ । १ । ८२ ॥ – स्कभ्नोति ।

‡ स्तम्भेः ॥ ८ । ३ । ६७ ॥
Preceded by an उपसर्ग (with an इण् वर्ण), स् of the root स्तम्भ् is replaced by ष्. This root also takes श्नु optionally ॥ ३ । १ । ८२ ॥

§ अवाच्चालम्बनाविदूर्ययोः ॥ ८ । ३ । ६८ ।
Preceded by अव, स् of स्तम्भ् is replaced by ष्, provided it is used in the sense of 'support' or 'proximity.
यष्टिम् अवष्टभ्नाति or अवष्टभ्नोति – (He) leans upon a stick.
पुरः धेनुम् अवष्टभ्नाति or अवष्टभ्नोति – (He) restrains the cow before him.
But if the cow is at a distance– भृत्यः गोष्ठे धेनुम् अवस्तभ्नाति or अवस्तभ्नोति – The servant barricades the cow in the cow-pen.

† उदः स्थास्तम्भोः पूर्वस्य ॥ ८ । ४ । ६१ ॥
Preceded by उद्, स् of स्था and स्तम्भ् is replaced by a 'सवर्ण' – which according to grammarians is थ्.
Thus, उद्+स्था = उद्+थ्था = उत्थ्था or उत्था ।
उद+स्तम्भ् = उत्तम्भ ।

Examples :

लुब्धमर्थेन गृह्णीयात् ।

जानन्ति पशवो गन्धात् ।

कुपुत्रः कृत्स्नं कुलं क्लिश्नाति ।

नियतेर्गतिः कः प्रतिष्टभ्नुयात् ।

देवाः क्षीरनिधिं सुधाममथ्नन् ।

पण्डितानां देह एव जृणाति प्रज्ञा तु वृद्धिं प्राप्नोति ।

पूति पर्युषितं चाऽन्नं नाऽश्नीयात् ।

नलादन्योऽश्वविद्यां को विजानीयात् ।

अपत्ये स्नेहः पितुः हृदयं दृढेण ग्रन्थिना सिनाति ।

धृष्टद्युम्नो द्रोणं केशेष्वगृह्णात् तीक्ष्णेन खड्गेन च तस्य मस्तकमलुनात् ।

मधुमासस्याऽऽगमे सहकारस्य जीर्णानि पर्णानि विशीर्यन्ते अभिनवा च मञ्जरी प्रादुर्भवति ।

———

CHAPTER VII

1. Bases ending in Consonants (Contd.)

2. त्रि, चतुर् and षट् Bases.

1. Bases ending in ह्.

हो ढः ॥ ८ । २ । ३१ ॥

Fully stated, पदस्य अन्ते झलि च हः ढः ।

ह् occurring at the end of a पद or followed by a झल् वर्ण is replaced by ढ्.

a. मधुलिह् वि० – One that licks honey; पुं० a bee.

Declension – पुं० and स्त्री०

मधुलिट् – ड्* मधुलिहौ मधुलिहः etc. (मधुलिड्भ्याम् । मधुलिट्सु or मधुलिट्त्सु‡)

नपुं० – मधुलिट्–ड् § मधुलिही मधुलिंहि† etc.

b. हव्यवाह् पुं० Bearing oblation, fire.

हव्यवाट्–ड् हव्यवाहौ हव्यवाहः हव्यवाहम् हव्यवाहौ

हव्यवाह्+शस् = हव्य+ऊ+आह्+अस् । व् is replaced by ऊ, See below (i).

= हव्य+ऊह्+अस् । ऊ+आ = ऊ संप्रसारणाच्च ॥ ६ । १ । १०८ ॥ (I, 14)

= हव्योहः । अ+ऊ = ओ, See below (ii)

(i) वाह ऊठ् ॥ ६ । ४ । १३२ ॥

Fully stated, वाहः भस्य संप्रसारणम् ऊठ् ।

---

* स् is elided by हल्ङ्याब्भ्यो० – ॥ ६ । १ । ६८ ॥ ह् is replaced by ढ् – हो ढः ॥ ८ । २ । ३१ ॥ ढ् by झलां जशो० – ॥ ८ । २ । ३९ ॥ Optionally ट् by वाऽवसाने ॥ ८ । ४ । ५६ ॥

‡ मधुलिड्+सु = मधुलिट्+ध्+सु । धुट् added optionally – डः सि धुट् ॥ ८ । ३ । २९ ॥ Chap. III

= मधुलिट्त्सु । खरि च ॥ ८ । ४ । ५५ ॥

or मधुलिट्सु ।

§ सु is elided by स्वमोर्नपुंसकात् ॥ ७ । १ ॥ २३ ॥

† नुमागम by नपुंसकस्य झलचः ॥ ७ । १ । ७२ ॥

न् is replaced by अनुस्वार – नश्चापदा० – ॥ ८ । ३ । २४ ॥

The व् in वाह् is replaced by संप्रसारण ऊठ्-ऊ (ठ् इत्) when the compound base is 'भ' (यचि भम् ॥ १ । ४ । १८ ॥ Chap. IX)

(ii) एत्येधत्यूठ्सु ॥ ६ । १ । ८९ ॥

Fully stated, आत् एचि एति-एधति-ऊठ्सु पूर्वपरयोः एकः वृद्धिः ।

वृद्धि is the single substitute for अ or आ+ए of एति and एधति, and for अ or आ+ऊ of ऊठ् (the substitute of वा in वाह्).

Similarly, हव्योहा, हव्यवाड्भ्याम् etc. (हव्यवाट्सु or हव्यवाट्त्सु)

c. तुरासाह् पुं० (तुरं सहते इति) One who is powerful, name of Indra.

(i) सहेः साडः सः ॥ ८ । ३ ५६ ॥

The स् in सह् when it appears in the form साड् is replaced by ष्. The ह् of तुरासाह् is replaced by ढ् (हो ढः ॥ ८ । २ । ३१ ॥ and ढ् by ड् - झलां जशो० – ॥

तुराषाट्-ड् तुरासाहौ तुरासाहः etc. (तुराषाड्भ्याम् । तुराषाट्सु or तुराषाट्त्सु)

d. कामदुह् वि० (कामं दोग्धि इति) Yielding what one desires,
A fabulous cow yielding all desires.

(i) दादेर्धातोर्घः ॥ ८ । २ । ३२ ॥

Fully stated, दादेः धातोः हः झलि पदान्ते च घः ।

The final ह् of a root beginning with द् is replaced by घ् followed by a झल् वर्ण or coming at the end of a पद.

(ii) एकाचो बशो भष् झषन्तस्य स्ध्वोः ॥ ८ । २ । ३७ ॥

Fully stated, एकाचः धातोः झषन्तस्य बशो भष् पदान्ते स्ध्वोः च ।

बश् (i. e. ब् ग् ड् द्) belonging to an एकाच् root (single-vowelled) which ends in झष् (i. e. झ् भ् घ् ढ् or ध) is replaced by the corresponding भष् (भ् घ् ढ् ध्) coming before स् or ध्व or if it occurs at the end of a पद. कामदुह् is a पद before भ्याम् भिस् भ्यस् and सु.

कामदुह् + स = कामदुघ् । दादेर्धातोः घः ॥
= कामधुघ् । एकाचो बशो० – ॥
= कामधुक्-ग् । झलां जशो० – ॥ वाऽव० – ॥

कामधुक्-ग् कामदुहौ कामदुहः etc. (कामधुग्भ्याम् । कामधुक्षु)

e. वा द्रुहमुहष्णुहष्णिहाम् ॥ ८ । २ । ३३ ॥

Fully stated, द्रुह्-मुह्-ष्णुह्-ष्णिहाम् धातोः हः घः वा झलि पदान्ते च ।

ह् in the roots द्रुह्, मुह्, स्नुह् and स्निह् is optionally replaced by घ् followed by a झल् वर्ण or if it comes at the end of a पद.

Alternately the general rule हो ढः ॥ applies.

द्रुह् वि० Injuring, hostile to; मित्रद्रुह् वि० A traitor.

ध्रुक्-ग् or ध्रुट्-ड् द्रुहौ द्रुहः etc. (ध्रुग्भ्याम्-ध्रुड्भ्याम् । ध्रुटसु-ध्रुट्त्सु)

मुह् वि० Stupefying; मनोमुह् वि० Bewitching.

मुक्-ग् or मुट्-ड् मुहौ मुहः etc. (मुग्भ्याम्-मुड्भ्याम् । मुट्सु-मुट्त्सु ।)

स्नुह् वि० Vomiting; गरलस्नुह् वि० Vomiting poison.

स्नुक्-ग् or स्नुट्-ड् स्नुहौ स्नुहः etc. (स्नुग्भ्याम्-स्नुड्भ्याम् । स्नुट्सु-स्नुट्त्सु)

स्निह् वि० Affectionate; स्त्री० Wetness, moisture.

स्निक्-ग् or स्निट्-ड् स्निहौ स्निहः etc. (स्निग्भ्याम्-स्निड्भ्याम् । स्निट्सु-स्निट्त्सु ।)

f. Nominal bases ending in नह्.

नहो धः ॥ ८ । २ । ३४ ॥

Fully stated, नहः धातोः हः धः झलि पदान्ते च ।

ह् of the root नह् is replaced by ध् followed by a झल् वर्ण or coming at the end of a पद.

उपानह् स्त्री० A sandal or shoe; परीणह् स्त्री० An enclosure.

उपानत्-द् उपानहौ उपानहः etc. (उपानद्भ्याम् । उपानत्सु ।)

परीणत्-द् परीणहौ परीणहः etc. (परीणद्भ्याम् । परीणत्सु ।)

g. अनडुह् पुं० An ox, a bullock (अनः वहति इति; अनस् – a cart).

अनडुह्+सु = अनडु+आ+ह्+स् । The augment आम् – See below (i)
= अनड्वा+न्+ह्+स् । The augment नुम् – See below (ii)
= अनड्वान् । स् is elided by हलङ्याब्भ्यो० – ॥ ६ । १ । ६९ ॥
ह् by संयोगान्तस्य० – ॥ ८ । २ । २३ ॥

(i) चतुरनडुहोरामुदात्तः ॥ ७ । १ । ९८ ॥

Fully stated, चतुरनडुहोः सर्वनामस्थाने आम् उदात्तः ।

The augment आम् bearing the उदात्त accent is added to the words चतुर् and अनडुह् before a सर्वनामस्थान affix. Being मित् the augment is placed immediately after the last vowel. (मिदचो० – ॥ १ । १ । ४७ ॥)

(ii) सावनडुहः ॥ ७ । १ । ८२ ॥

Fully stated, अनडुहः सौ नुम् ।

The augment नुम् is added to अनडुह् before the affix सु (प्र० एक० and सम्बो० एक०)

अनड्वान्	अनड्वाहौ	अनड्वाहः
अनड्वाहम्	अनड्वाहौ	अनडुहः (Not being सर्वनामस्थान)
अनडुहा	अनडुह्+भ्याम् = अनडुद्भ्याम्	ह् is replaced by द् See (iii)

(iii) वसुस्रंसुध्वंस्वनडुहां दः ॥ ८ । २ । ७२ ॥

Fully stated, वसु-स्रंसु-ध्वंसु-अनडुहां पदस्य अन्तस्य दः ।

The final in case of वसु, स्रंसु and ध्वंसु and अनडुह् is replaced by द् when they are regarded as पदs.

अनडुत्सु ।

For the vocative - अनडुह्+सु ।

= अनडु+अ+ह्+स् ।	The augment अम्, see below (iv)
= अनड्व+ह्+स ।	
= अनड्वन्+ह्+स् ।	सावनडुहः ॥ ७ । १ । ८२ ॥
= अनड्वन् ।	स् is elided by हल्ङ्या० – ॥
	ह् is elided by संयोगा० – ॥

(iv) अम् संबुद्धौ ॥ ७ । १ । ९९ ॥

Fully stated, चतुरनडुहोः सम्बुद्धौ अम् ।

For the vocative, अम् is added to चतुर and अनडुह्. Being मित्, अ comes immediately after the last vowel in the base.

2. Declension of त्रि and चतुर्.

These are technically known as संख्या words and they are declined only in the plural.

a. त्रि – Three, this is treated as a घि base.

पुं० – त्रयः त्रीन् त्रिभिः त्रिभ्यः त्रिभ्यः

त्रि+आम् = त्रय+आम् ।	त्रि is replaced by त्रय, see below (i)
= त्रयाणाम् ।	The augment नुम् – ह्रस्वनद्या० – ॥ ७ । १ । ५४ ॥ The preceding अ is lengthened – नामि ॥ ६ । ४ । ३ ॥ न् is replaced by ण्.

(i) त्रेस्त्रयः । ७ । १ । ५३ ॥

त्रि is replaced by त्रय before आम्. त्रिषु ।

स्त्री० – त्रि is replaced by तिसृ in the feminine gender by the rule –

(ii) त्रिचतुरोः स्त्रियां तिसृचतसृ ॥ ७ । २ । ९९ ॥

त्रि and चतुर् are replaced by तिसृ and चतसृ in the feminine gender followed by a सुप् affix.

(iii) अचि र ऋतः ॥ ७ । २ । १०० ॥

Fully stated, तिसृ-चतसृ ऋतः अचि विभक्तौ रः ॥

The ऋ of तिसृ and चतसृ is replaced by र् followed by a सुप् affix beginning with a vowel.

तिस्रः तिस्रः तिसृभिः तिसृभ्यः तिसृभ्यः

तिसृ + आम् = तिसृणाम । तिसृषु ।

The final ऋ is not lengthened before नाम् by the rule -

(iv) न तिसृचतसृ ॥ ६ । ४ । ४ ॥

Fully stated, तिसृचतसृ (इत्येतयोः) नामि न दीर्घः ।

The final vowels of तिसृ and चतसृ are not lengthened before नाम्.

नपुं० – त्रीणि त्रीणि त्रिभिः त्रिभ्यः त्रिभ्यः त्रयाणाम् त्रिषु ।

b. चतुर् - Four.

पुं० – चतुर् + जस् = चतु + आ + र् + अस् । The augment आम् – चतुरन० – ॥

= चत्वारः ।

चतुरः । चतुर्भिः । चतुर्भ्यः । चतुर्भ्यः ।

चतुर् + आम् = चतुर् + नाम् । The augment नुम् – See below (i)

= चतुर्णाम ।

or चतुर्ण्णाम । ण् is optionally duplicated अचो रहाभ्यां द्वे ॥ ८ । ४ । ४६ ॥ (II, 18)

(i) षट्चतुर्भ्यश्च ॥ ७ । १ । ५५ ॥

Fully stated, षट्चतुर्भ्यः च आमि नुट् ।

After षट् bases and चतुर्, आम् takes the augment नुम्.

चतुर् + सुप् = चतुर्षु । ष् by आदेशप्रत्यययोः ॥ ८ । ३ । ५९ ॥

Here र् is not replaced by विसर्ग (खरवसान० – ॥ ८ । ३ । १५ ॥) on account of the following सूत्र –

(ii) रोः सुपि ॥ ८ । ३ । १६ ॥

Fully stated, रोः सुपि विसर्जनीयः ।

Only रु–र् (उ इत्) is replaced by विसर्ग before सुप्.(स० बहुव०)

र् of चतुर् is part of the word – it is not the substitute रु ordained by ससजुषो रुः ॥ ८ । २ । ६६ ॥

Moreover ष् following र् will not be duplicated by अचो रहाभ्यां० – ॥ on account of the following सूत्र –

(iii) शरोऽचि ॥ ८ । ४ । ४९ ॥

Fully stated, शरः अचि न द्वे ।

A शर् वर्ण (श ष् स्) followed by a vowel is not duplicated.

स्त्री० – चतुर् is replaced by चतसृ ।

चतस्रः चतस्रः चतसृभिः चतसृभ्यः चतसृभ्यः चतसृणाम् चतसृषु ।

नपुं० – चत्वारि चत्वारि चतुर्भिः चतुर्भ्यः चतुर्भ्यः चतुर्णाम् चतुर्षु ।

3. षट् bases.

(i) ष्णान्ता षट् ॥ १ । १ । २४ ॥

A संख्या word ending in ष् and न् is known as षट्.

षष् – Six, पञ्चन् – Five, सप्तन् – Seven, अष्टन् – Eight, नवन् – Nine, दशन् – Ten, एकादशन् – Eleven etc.

(ii) डति च ॥ १ । १ । २५ ॥

Fully stated, डति च संख्या षट् ।

A संख्या word ending in डति is also known as षट्.

The pronoun किम् takes the affix डति – अति (ड् इत्) in the sense of 'the measure of' or 'a number'.

किम्+डति = कति । The टि (इम्) is elided before a डित् affix.

टेः ॥ ६ । ४ । १४३ ॥ (II, 19)

– How many.

(iv) न षट्स्वस्रादिभ्यः ॥ ४ । १ । १० ॥

Fully stated, षट्स्वस्रादिभ्यः स्त्रियां टाप् ङीप् न ।

षट् bases and the word स्वसृ etc. do not take the feminine affix टाप् or ङीप्.

(v) ष्णान्ता संख्या ॥ लि० सू० १८५ ॥

Fully stated, ष्णान्ता संख्या अविशिष्टलिङ्गम् ।

संख्या words ending in ष् and न् have no specific gender.

They are declined in the same way for all the three genders. The संख्या word कति also has a common declension for all the three genders (अव्ययं कतियुष्मदस्मदः ॥ लि० सू० १८४ ॥)

a. षष् – Six.

षड्भ्यो लुक् ॥ ७ । १ । २२ ॥

Fully stated, षड्भ्यः जश्शसोः लुक् ।

जस् and शस् are elided after षट् bases.

Thus, षट्–ड् षट्–ड् षड्भिः षड्भ्यः षड्भ्यः षण्णाम्* षट्सु–षट्त्सु ।

b. पञ्चन् – Five.

पञ्च‡ पञ्च पञ्चभिः पञ्चभ्यः पञ्चभ्यः पञ्चानाम् पञ्चसु ।

---

* षष्+आम् = षड्+नाम् = षण्णाम् । ड् is replaced by ण्, the corresponding अनुनासिक by प्रत्यये भाषायां० – ॥ वा०

‡ अस् is elided by षड्भ्यो लुक्, न् is elided by नलोपः प्रातिपदिकान्तस्य ॥ ८ । २ । ७ ॥ (II, 12)

नोपधायाः ।। ६ । ४ । ७ ।।

The penultimate of a base ending in न् is lengthened before नाम्.
Similarly, सप्तन्, नवन्, दशन् etc.

c. अष्टन् – Eight.

Being a षट् base it is declined like पञ्चन्.

अष्ट अष्ट अष्टभिः अष्टभ्यः अष्टभ्यः अष्टानाम् अष्टसु ।

Alternately,

(i) अष्टन आ विभक्तौ ।। ७ । २ । ८४ ।।

The final of the base अष्टन् is replaced by आ before a सुप् affix.

(ii) अष्टाभ्य औश् ।। ७ । १ । २१ ।। (जश्शसोः)

The affixes जस् and शस् are replaced by औश्–औ (श् इत) added to अष्टा (i. e. अष्टन् when it becomes अष्टा).

अष्टन्+जस् = अष्टा+औ = अष्टौ । वृद्धिरेचि । ६ । १ । ८८ ।।

अष्टौ अष्टौ अष्टाभिः अष्टाभ्यः अष्टाभ्यः अष्टानाम् अष्टासु ।

d. कति – How many.

The affixes जस् and शस् are elided by षड्भ्यो लुक् ।

कति कति कतिभिः कतिभ्यः कतिभ्यः कतीनाम् कतिषु ।

Examples :

स्तोता हव्यवाहं तिसृभिर्ऋग्भिरगृणात् ।
कतिभिरनडुद्भिस्ते प्रयोजनम् ।
हले प्रष्ठवाड् युज्यताम् कृषये च विनीयताम् ।
कतरा धेनुस्तव प्रशस्ता — प्रष्ठौही दित्यौही वा* ।
देहभृतां चतस्रोऽवस्था भवन्ति — बाल्यं कौमारं यौवनं वार्धक्यंच ।
भुजङ्गममिव क्षीरभुजं गरलस्नुहं च खलं सदा परिहरेत ।
स्निहि को तु न रज्येत द्रुहं चाऽपि क्षमेत कः ।
वसिष्ठस्य कामधुगचिरेण बहून् योधानस्त्राणि चासूयत ।

———

* वाहः ।। ४ । १ । ६१ ।।

Fully stated, वाहः प्रातिपदिकात् स्त्रियां ङीष् ।

The affix ङीष्–ई (ङ् ष् इत्) is added to a प्रातिपदिक base ending in वाह् to form a feminine base.

दित्यौही – A cow with calf (twice)

प्रष्ठौही – A cow with a calf for the first time.

The rules वाह ऊठ् ।। and एत्येधत्यठ्सु ।। apply.

CHAPTER VIII

Roots of the रुधादि class.

लट् – लङ् – लोट् – विधिलिङ् ।

1. Roots belonging to the सप्तम गर्ण (seventh class) are known as रुधादि after the root रुधिर् आवरणे which leads the group in the धातुपाठ.

रुधादिभ्यः श्नम् ॥ ३ । १ । ७८ ॥

Fully stated, रुधादिभ्यः कर्तरि सार्वधातुके श्नम् ।

The affix श्नम्–न (श् म् इत्) is added to the roots of the रुधादि class followed by a सार्वधातुक affix to indicate the agent. The affix श्नम्, being मित्, is added immediately after the last vowel of the root – मिदचोऽन्त्यात्परः ॥ १ । १ । ४७ ॥ (I, 6)

2. The affix श्नम् is by itself सार्वधातुक as it has the indicatory श् attached to it – तिङ्शित्० – ॥ ३ । ४ । ११३ ॥
3. The affix श्नम् is treated as ङित्, not being पित् – सार्वधातुकम० – ॥ १ । २ । ४ ॥
4. For लट्, लङ्, लोट् and विधिलिङ्, तिङ् affixes enumerated in Chap. I, sec. 8 apply.
5. Conjugation.

a. रुधिर् आवरणे रुधा० उ० प० — रुध् to obstruct.

रुध्+श्नम्+तिप् = रु+न+ध्+ति । — न is added after उ.
= रुणध्+ति । — न् is replaced by ण्.
= रुणध्+धि । — त् is replaced by ध्. See below – (i)
= रुणद्धि । — The first ध् is replaced by द् – झलां जश्० ॥ ८ । ४ । ५३ ॥ (I, 14)

(i) झषस्तथोर्धोऽधः ॥ ८ । २ । ४० ॥

Rearranged, अधः झषः तथोः धः ।

त् and थ् following a झष् वर्ण (झ् भ् घ् ढ् ध्) not belonging to the root धा, is replaced by ध्.

रुध् + श्नम् + तस् = रु + न + ध् + तस् ।
= रुन्ध् + तस् । अ of न is elided as तस् is ङित्. See below (ii)
= रुन्ध्+धस् । झषस्तथो० – ॥ ८ । २ । ४० ॥
= रुन्द्+धस् । झलां जश्० – ॥ ८ । ४ । ५३ ॥
= रुन्द्धः or रुन्धः । द् is elided optionally, see below (iii)

(ii) श्नसोरल्लोपः ॥ ६ । ४ । १११ ॥

Fully stated, श्नसोः सार्वधातुके क्ङिति परे अल्लोपः ।

The अ of the affix श्नम् and of the root अस् (भुवि, अदा० प० प०) is elided before a सार्वधातुक affix which is कित् or ङित्.

(iii) झरो झरि सवर्णे ॥ ८ । ४ । ६५ ॥

Fully stated, हलः झरः सवर्णे झरि अन्यतरस्यां लोपः ।

A झर् वर्ण (a consonant other than a semi-vowel, a nasal or ह्) following a consonant is elided optionally before a homogeneous झर् वर्ण.

प० प० रुणद्धि रुन्द्धः रुन्धन्ति । रुणत्सि* रुन्द्धः रुन्द्ध । रुणध्मि रुन्ध्वः रुन्ध्मः ।

आ० प० रुन्द्धे–न्धे रुन्धाते रुन्धते । रुन्त्से रुन्धाथे रुन्द्ध्वे–न्ध्वे । रुन्धे रुन्ध्वहे रुन्ध्महे ।

लङ् ।

रुध् + श्नम् + त् = अ + रुणध् ।		त् is elided - हल्ङ्या० – ॥ ६ । १ । ६८ ॥
	= अरुणद् ।	ध् is replaced by द् - झलां० – ॥ ८ । २ । ३९ ॥
	or अरुणत् ।	वाऽवसाने ॥ ८ । ४ । ५६ ॥
रुध् + श्नम् + स् = अरुणध् ।		स् is elided.
	= अरुणद् ।	झलां जशोऽन्ते ॥ ८ । २ । ३९ ॥
	or अरुणरु ।	द् is optionally replaced by रु See below (iv)
	i. e. अरुणः ।	
	or अरुणत् ।	वाऽवसाने ॥ ८ । ४ । ५६ ॥

(iv) दश्च ॥ ८ । २ । ७५ ॥

Fully stated, धातोः पदस्य अन्ते दश्च सिपि रुः वा ।

The final द् of a root-base is replaced by रु-र् (उ इत्) optionally before सिप् (म० पु० एक०)

प० प० अरुणत्–द् अरुन्द्धाम्–न्धाम् अरुन्धन् । अरुणः, अरुणत्–द् अरुन्द्धम्–न्धम् अरुन्द्ध–न्ध । अरुणधम् अरुन्ध्व अरुन्ध्म ।

आ० प० अरुन्द्ध–न्ध अरुन्धाताम् अरुन्धत । अरुन्द्धा–न्धाः अरुन्धाथाम् अरुन्द्ध्वम्–न्ध्वम् । अरुन्धि अरुन्ध्वहि अरुन्ध्महि ।

लोट ।

The लोट् affix हि (म० पु० एक०) is replaced by धि by the rule-

(v) हुझल्भ्यो हेर्धिः ॥ ६ । ४ । १०१ ॥

---

* रुणत्सि – ध् is replaced by त् – खरि च ॥ ८ । ४ । ५५ ॥ (II, 3)

The प० प० म० पु० एक० affix हि added to the root-base हु (जुहो०) and a root-base ending in a झल् वर्ण, is replaced by धि.

रुन्ध्+हि = रुन्ध्+धि = रुन्द्धि or रुन्धि ।

प० प० रुणद्धु रुन्द्धाम्-न्धाम् रुन्धन्तु । रुन्द्धि-न्धि रुन्द्धम्-न्धम् रुन्द्ध-न्ध । रुणधानि रुणधाव रुणधाम ।

आ० प० रुन्द्धाम्-न्धाम् रुन्धाताम् रुन्धताम् । रुन्त्स्व रुन्धाथाम् रुद्ध्वम्-न्ध्वम् । रुणधै रुणधावहै रुणधामहै ।

विधिलिङ् ।

प० प० रुन्ध्यात् रुन्ध्याताम् रुन्ध्युः । रुन्ध्याः रुन्ध्यातम् रुन्ध्यात । रुन्ध्याम् रुन्ध्याव रुन्ध्याम ।

आ० प० रुन्धीत रुन्धीयाताम् रुन्धीरन् । रुन्धीथाः रुन्धीयाथाम् रुन्धीध्वम् । रुन्धीय रुन्धीवहि रुन्धीमहि ।

b. हिसि हिंसायाम् रुधा० प० प० हिंस्* to strike, to kill.

लट् ।

हिंस्+श्नम्+तिप् = हि+न+न्स्+ति ।
= हि+न+स्+ति । न् following श्नम् is elided, see below (i)
= हिनस्ति ।

(i) श्नान्नलोपः ॥ ६ । ४ । २३ ॥
न् following श्नम् is elided.

हिंस्+श्नम्+तस् = हिंस्तः । श्नसोरल्लोपः ॥ ६ । ४ । १११ ॥

हिनस्ति हिंस्तः हिंसन्ति । हिनस्सि हिंस्थः हिंस्थ । हिनस्मि हिंस्वः हिंस्मः ।

लङ् ।

हिंस्+श्नम्+त् = अ+हिनस् । त् is elided – हल्ङ्या० – ॥
= अ+हिनद् । स् is replaced by द् see below (ii)
= अहिनत्-द् ।

(ii) तिप्यनस्तेः ॥ ८ । २ । ७३ ॥
Fully stated, अनस्तेः पदस्य अन्ते सः तिपि दः ।

स् occurring at the end of a पद, other than of the root अस् भुवि (अदा० प० प०) is replaced by द् before तिप्.

This rule will be applicable only after the elision of त् (प्र० पु० एकव० लङ्) and स् (म० पु० एकव० लङ्)

---

* इदितो नुम् धातोः ॥ ७ । १ । ५८ ॥

अहिंस्ताम् । अहिंसन् ।

हिंस्+श्नम्+स् = अ+हिनस् ।

= अहिनद् or अहिनर् । स् is optionally replaced by र्. See below (iii)

= अहिनत्–द् or अहिनः ।

(iii) सिपि धातो रुर्वा ॥ ८ । २ । ७४ ॥

Fully stated, धातोः पदस्य सः दः रुः वा ।

स् occurring at the end of a पद formed by a धातु is replaced by द् or रु before the ending सिप् – स् (म॰ पु॰ एक॰ लङ्)

अहिनत्–द् अहिंस्ताम् अहिंसन् । अहिनः –अहिनत्–द् अहिंस्तम् अहिंस्त । अहिनसम् अहिंस्व अहिंस्म ।

लोट् ।

हिनस्तु हिंस्ताम् etc.

हिंस्+श्नम्+हि = हिंस्+धि । हुझल्भ्यो॰ – ॥ ६ । ४ । १०१ ॥

= हिन्+धि । स् elided – see below (iv)

or हिन्द्+धि । झलां जश्॰ – ॥ ८ । ४ । ५३ ॥

= हिन्धि or हिन्द्धि ।

(iv) धि च ॥ ८ । २ । २५ ॥

Fully stated, सस्य धि च लोपः ।

स् is elided before an affix beginning with ध्.

हिनस्तु हिंस्ताम् हिंसन्तु । हिन्धि–न्द्धि हिंस्तम् हिंस्त । हिनसानि हिनसाव हिनसाम ।

विधिलिङ् ।

हिंस्यात् हिंस्याताम् हिंस्युः । हिंस्याः हिंस्यातम् हिंस्यात । हिंस्याम् हिंस्याव हिंस्याम ।

c. तृह हिंसायाम् रुधा॰ प॰ प॰ तृह् to injure, to kill.

लट् ।

तृह्+श्नम्+तिप् = तृनह्+ति ।

= तृणह्+ति । न् is replaced by ण्.

= तृण+इ+ह्+ति । The augment इम् – see below (i)

= तृणेह्+ति ।

= तृणेढ्+धि । ह् is replaced by ढ् – हो ढः ॥ ८ । २ । ३१ ॥

त् is replaced by ध् – झषस्तथो॰ – ॥ ८ । २ । ४० ॥

= तृणेढ्+ढि । ष्टुनाष्टुः ॥ ८ । ४ । ४१ ॥

= तृणेढि । ढ् is elided – see below (ii)

(i) तृणह इम् ॥ ७ । ३ । ९२ ॥

Fully stated, तृणहः हलि पिति सार्वधातुके इम् ।

Followed by a पित् सार्वधातुक affix, beginning with a consonant, तृणह् takes the augment इम्–इ (म् इत्). Being मित् it is added immediately after the last vowel in the base.

This rule will also apply to सिप् and मिप्.

(ii) ढो ढे लोपः ॥ ८ । ३ । १३ ॥

ढ् is elided followed by another ढ्.

तृह्+श्नम्+तस् = तंह्+तस् । श्नसोरल्लोपः ॥ ६ । ४ । १११ ॥
= तृंढ्+धस् । हो ढः ॥ ८ । २ । ३१ ॥ झषस्तथो० – ॥ ८ । २ । ४० ॥
= तृंढ्+ढस् । ष्टुनाष्टुः ॥ ८ । ४ । ४१ ॥
= तृन्+ढस् । ढो ढे लोपः ॥ ८ । ३ । १३ ॥
= तृण्ढः ।

तृंहन्ति ।

तृह्+श्नम्+सिप् = तृणेह्+सि ।
= तृणेढ्+सि । हो ढः ।
= तृणेक्+सि । षढोः कः सि ॥ ८ । २ । ४१ ॥ (Chap. v)
= तृणेक्+षि । आदेश० – ॥ ८ । ३ । ५९ ॥
= तृणेक्षि ।

लट् – तृणेढि तृण्ढः तृंहन्ति । तृणेक्षि तृण्ढः तृण्ढ । तृणेह्मि तृंह्वः तृंह्मः ।

लङ् – अतृणेट्–ड् अतृण्ढाम् अतृंहन । अतृणेट्–ड् अतृण्ढम् अतृण्ढ । अतृणहम् अतृंह्व अतृंह्म ।

लोट् – तृणेढु तृण्ढाम् तृंहन्तु । तृण्ढि तृण्ढम् तृण्ढ । तृणहानि तृणहाव तृणहाम ।

विधि० – तृंह्यात् तृंह्याताम् तृंह्युः । तृंह्याः तृंह्यातम् तृंह्यात । तृंह्याम् तृंह्याव तृंह्याम ।

d. पिष्लृ संचूर्णने रुधा० प० प० पिष् to crush or grind.

लट् ।

पिष्+श्नम्+तिप् = पिनष्+ति ।
= पिनष्टि । ष्टुना ष्टुः ॥ ८ । ४ । ४१ ॥

पिष्+श्नम्+सिप् = पिनष्+सि ।
= पिनक्+सि । षढोः० – ॥ ८ । २ । ४१ ॥
= पिनक्षि । आदेश० – ॥ ८ । ३ । ५९ ॥

पिनष्टि पिंष्टः पिंषन्ति etc.

लङ् – अपिनट्–ड् अपिंष्टाम् अपिंषन् etc.

लोट् – पिनष्टु पिंष्टाम् पिंषन्तु etc.*
विधि० – पिंष्यात् पिंष्याताम् पिंष्यु: etc.

e. ञिइन्धी दीप्तौ रुधा० आ० प० इन्ध् to kindle.
लट् – इन्द्धे-न्धे इन्धाते इन्धते etc.
लङ् – ऐन्द्ध-न्ध ऐन्धाताम् ऐन्धत etc.
लोट् – इन्द्धाम्-न्धाम् इन्धाताम् इन्धताम् etc.
विधि० – इन्धीत इन्धीयाताम् इन्धीरन् etc.

f. छिदिर् द्वैधीकरणे रुधा० उ० प० छिद् to cut or destroy.
लट् – प० प० छिनत्ति छिन्त्त:-न्त: छिन्दन्ति etc.
आ० प० छिन्त्ते-न्ते छिन्दाते छिन्दते etc.
लङ् – प० प० अच्छिनत्-द्† अच्छिन्त्ताम्-न्ताम् अच्छिन्दन् etc.
आ० प० अच्छिन्त्त-न्त अच्छिन्दाताम् अच्छिन्दत etc.
लोट् – प० प० छिनत्तु छिन्त्ताम्-न्ताम् छिन्दन्तु etc.
आ० प० छिन्त्ताम्-न्ताम् छिन्दाताम् छिन्दताम् etc.
विधि०– प० प० छिन्द्यात् छिन्द्याताम् छिन्द्यु: etc.
आ० प० छिन्दीत छिन्दीयाताम् छिन्दीरन् etc.

6. For the passive construction all roots take the affix यक् followed by आ० प० तिङ् endings. (Chap. I, see. 9)

रुध् – रुध्यते । अरुध्यत । रुध्यताम् । रुध्येत ।
हिंस् – हिंस्यते । अहिंस्यत । हिंस्यताम् । हिंस्यत ।
इन्ध् – अनिदितां हल उपधाया क्ङिति ॥ इति नलोप: ।
इध्यते । ऐध्यत । इध्यताम् । इध्येत ।

7. Roots of the रुधादि class.

अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु प० प० अञ्ज् – to make clear, to smear with, to shine, to go.

With वि (व्यञ्ज्(– to decorate, to reveal; with सम् – to adorn, to unite.

---

* पिष्+श्नम्+हि = पिंष्+धि ।
= पिंड्+ढि । ष् is replaced by ड् – झलां जश्० – ॥ ८ । ४ । ५३ ॥
ध् is replaced by ढ् – ष्टुना० – ॥ ८ । ४ । ४१ ॥
= पिण्ड्ढि ।
or पिण्ढि । ड् is elided optionally – झरो झरि० – ॥ ८ । ४ । ६५ ॥

† The augment तुक् is added to a preceding short vowel when छ follows – छे च ॥ ६ । १ । ७३ ॥

उन्दी क्लेदने प० प० उन्द् - to wet; to bathe.

क्षुदिर् सम्पेषणे उ० प० क्षुद् - to trample upon, to crush

खिद दैन्ये आ० प० खिद् - to be tired or depressed, to suffer pain.

(Also दिवादि आ० प०, खिद परिघाते तुदादि प० प०)

छिदिर् द्वैधीकरणे उ० प० छिद् - to cut or divide, to destroy, to remove.

With अव (अवच्छिद्)* - to cut off, to define; with आ (आच्छिद्)‡ - to cut off, to take over, to remove; with उद् (उच्छिद्) - to eradicate, to destroy; with वि (विच्छिद्) - to cut off, to separate; with वि & अव (व्यवच्छिद्) to cut off.

पृची सम्पर्के प० प० पृच् - to connect or join.

With सम् - to connect, to unite.

भञ्जी आमर्दने प० प० भञ्ज् - to break or shatter, to rout.

With अव - to break down, to smash; with प्र - to break up, to crush; with वि - to break asunder, to shatter.

भिदिर् विदारणे उ० प० भिद् - to split, to break, to divide or pierce.

With उद् - to break out, to burst forth; with निस् or निर् - to break through; with प्र - to split asunder; with प्रति - to pierce, to disclose; with वि - to break in pieces, to separate.

भुज पालनाभ्यवहारयोः§ भुज् to protect or rule (प० प०), to eat (आ० प०).

With उप (आ० प०) - to enjoy, to taste; with सम् (आ० प०) - to eat together or enjoy.

युजिर् योगे उ० प०† युज् to join, to yoke, to employ.

(Also चुरादि - युज संयमने, the युजादि group)

With अनु (आ० प०) - to enjoin, to question; with अभि (आ० प०) - to put to (as horses to a carriage) for a special purpose, to charge with;

---

* तुक् - छे च ॥ ६ ॥ १ । ७३ ॥ (15, I)

‡ आङ्माङोश्च ॥ ६ । १ । ७४ ॥ (12, II)

§ भुजोऽनवने । १ । ३ । ६६ ॥

भुज् takes आ० प० affixes when it is used in a sense other than 'to protect'. Here the root of the रुधादि class is to be considered, not भुजो कौटिल्ये, तुदादि ।

† प्रोपाभ्यां युजेरयज्ञपात्रेषु ॥ १ । ३ । ६४ ॥

Preceded by प्र and उप, the root युज् takes आ० प० affixes provided it is not used with reference to sacrificial vessels.

स्वराद्यन्तोपसर्गात् इति वक्तव्यम् ॥ (वा०)

The rule is extended by this वार्तिक to all उपसर्गs beginning with or ending with vowels. Thus it does not apply to 'सम्'.

with आ (आ० प०) – to join to, to accommodate with etc.; with उद् (आ० प०) – to join, to make effort; with उप (आ० प०) – to harness to, to use etc.; with नि (आ० प०) – to bind on, to order etc.; with प्र (आ०प०) – to yoke to, to employ etc.; with प्रति (आ० प०) – to fasten on, to oppose, to pay back; with वि (आ० प०) – to disjoin; with सम् (उ० प०)– to join together, to endow with.

रिचिर् विरेचने उ० प० रिच् – to empty, to evacuate.

With अति – to be left with a surplus; with उद् – to stand out prominently, to increase; with वि – to extend beyond, to be emptied.

The causal form is रेचि – to cause to empty or evacuate; with वि – to empty.

रुधिर् आवरणे उ० प० रुध् – to obstruct, to shut up, to besiege.

With अनु – to surround (Also दिवादि आ० प० – to conform to, to follow, to love); with अव – to obstruct, to confine; with उप – to lock in, to molest; with नि – to restrain, to shut up, to invest; with प्रति – to check, to resist; with वि – to oppose; with सम् to stop, to confine.

विचिर् पृथग्भावे उ० प० विच् – to sift, to separate.

With वि – to divide or separate from, to discriminate.

ओविजि भयचलनयो: प० प० विज् - to fear, to tremble.
(Also तुदादि आ० प०, usually with उद्)

विद विचारणे आ० प०* विद् – to consider, to know.

वृजी वर्जने प० प० वृज् – to avoid, to shun. (Also चुरादि–युजादि)

With अप – to avert, to destroy; with उद् – to pluck out; with परि – to pass over, to avoid; with वि – to exclude, to abandon; with सम् – to sweep together, to lay hold of.

शिष्लृ विशेषणे प० प० शिष् – to distinguish, to leave as remaining.
(Also चुरादि उ० प० – शिष असर्वोपयोगे)

With अव – to remain over; with उद् (उच्छिष्) – to be left remaining; with वि – to distinguish, to enhance. The causal form is शेषि; with वि – to distinguish, to surpass; with निस् – निर् (नि:शेषि - निश्शेषि) – to reduce to nothing; with अव – to leave as remaining.

* Compare विद सत्तायाम् दिवा० आ० प० विद्लृ लाभे तुदा० उ० प०, विद ज्ञाने अदा० प० प० ।

Examples :

कृतिर्वाचोऽतिरिच्यते ।
सुरा लज्जां शीलं चोच्छिनत्ति ।
द्विवितस्तिपरिमितां रज्जुमवच्छिन्धि ।
इदानीं स्वस्याविनयस्य फलमुपभुंक्ष्व ।
कुरुयोधमुख्या अभिमन्युमाहवे सर्वतः समरुन्धन् ।
तन्तुकीटः कतिपयैर्दिवसैः कोषं निर्भिनत्ति पतङ्गस्य चाकारेण निष्क्रामति ।
यो नाऽऽत्मजे न च गुरौ न च भृत्यवर्गे दीने दयां न कुरुते न च बन्धुवर्गे ।
किं तस्य जीवितफलेन मनुष्यलोके काकोऽपि जीवति चिराय बलिं च भुङ्क्ते ।
साम्प्रतं कृत्रिमा प्रणाली लोहितसमुद्रं भूमध्यसागरेण संयुनक्ति ।
अहो खलभुजंगस्य विपरीतो वधक्रमः ।
अन्यस्य दशति श्रोतमन्यः प्राणैर्वियुज्यते ।।

————

CHAPTER IX

प्रातिपदिक bases ending in न्

1. राजन् पुं० A king, a chief.
सीमन् स्त्री० A boundary.
नामन् नपुं० A name.

राजन् + सु = राजान् + स् । The penultimate अ is lengthened – see below (i)
= राजान् । स् is elided – हल्ङ्या० – ॥ ६ । १ । ६८ ॥
= राजा । न् is elided - see below (ii)

(i) सर्वनामस्थाने चाऽसंबुद्धौ ॥ ६ । ४ । ८ ॥ (I, 18)

The penultimate vowel of a base ending in न् is lengthened before a सर्वनामस्थान affix other than the vocative singular.

(ii) नलोपः प्रातिपदिकान्तस्य ॥ ८ । २ । ७ ॥ (II, 12)

न् occurring at the end of a प्रातिपदिक base (a nominal stem) which is a पद, is elided.*

राजन् + औ = राजान् + औ । सर्वनामस्थाने० – ॥
= राजानौ ।

राजानः । राजानम् । राजानौ ।

राजन् + शस् = राजन् + अस् ।
= राज्न् + अस् । अ of अन् is elided – see below (iii)
= राज्ञ् + अस् । न् is replaced by ञ् – स्तोः० – ॥ ८ । ४ । ४० ॥ (I, 1)
= राज्ञः । (ज्+ञ् = ज्ञ् – जञोर्ज्ञः । सि. कौ.)

(iii) अल्लोपोऽनः ॥ ६ । ४ । १३४ ॥

Fully stated, अनः भस्य अङ्गस्य अल्लोपः ।

The अ of a भ base ending in अन् is elided. राजन् is treated as भ before शस् – यचि भम् ॥ १ । ४ । १८ ॥ (Ch. III)

राजन् + टा = राज्न् + आ = राज्ञा ।
राजन् + भ्याम् = राजभ्याम् । न् is elided by नलोपः० – ॥ ८ । २ । ७ ॥
राजन् + ङि = राजन् + इ or राज्न् + इ । अ is elided optionally– see below (iv)
= राजनि or राज्ञि ।

---

* This does not apply to a root-base. The म० पु० एकव० (लङ्) for the root हन् is अहन्–न् is not elided.

(iv) विभाषा ङिश्योः ॥ ६ । ४ । १३६ ॥

Fully stated, अनः अल्लोपः विभाषा ङिश्योः ।

The अ of a base ending in अन् is elided optionally before ङि॰ (स॰ एक॰) and शी (प्र॰ and द्वि॰ द्विवचन, नपुं॰)

For the संबो॰ प्र॰ - राजन् + सु = राजन् ।

The penultimate अ is not lengthened – सर्वनामस्थाने॰ – ॥ ६ । ४ । ८ ॥
The final न् is not elided -

(v) न ङिसंबुद्ध्योः ॥ ८ । २ । ८ ॥

Fully stated, प्रातिपदिकान्तस्य नलोपः न ङिसंबुद्ध्योः ।

न् occurring at the end of a प्रातिपदिक base, which is a पद, is not elided before ङि (स॰ एक॰) and संबो॰ एकवचन.*

राजन् पुं॰ – राजा राजानौ राजानः। राजानम् राजानौ राज्ञः। राज्ञा राजभ्याम् राजभिः। राज्ञे राजभ्याम् राजभ्यः। राज्ञः राजभ्याम् राजभ्यः। राज्ञः राज्ञोः राज्ञाम् । राजनि or राज्ञि राज्ञोः राजसु । हे राजन् राजानौ राजानः।

सीमन् स्त्री॰ is declined in the same way – सीमा सीमानौ सीमानः । सीमानम् सीमानौ सीम्नः। सीम्ना सीमभ्याम् सीमभिः etc.
(सीमनि or सीम्नि, हे सीमन्)

नामन् नपुं॰

नामन् + सु = नामन् । सु is elided – स्वमोर्नपुं॰ – ॥ ७ । १ । २३ ॥
= नाम । न् is elided by नलोपः॰ – ॥ ८ । २ । ७ ॥
नामन् + शी = नामनी or नाम्नी । विभाषा ङिश्योः ॥ ६ । ४ । १३६ ॥
नामन् + शि = नामानि । सर्वनामस्थाने॰ – ॥ ६ । ४ । ८ ॥

The second triplicate is the same as the first. The rest is the same as for राजन्. For the संबुद्धि, however, हे नामन् or नाम ।

(vi) संबुद्धौ नपुंसकानां नलोपो वा वाच्यः ॥ (वा॰)

न् occurring at the end of a neuter base is elided optionally before the Voc. sing.

2. अध्वन् पुं॰ A way or road, distance.
आत्मन् पुं॰ The soul, self.
पर्वन् नपुं॰ A joint or knot, a fixed time, a festival.
चर्मन् नपुं॰ Skin, hide.
मूर्धन् पुं॰ The head, a top.

---

* The example regarding ङि occurs only in Vedic lit. – परमे व्योमन्, in the highest heaven.

न संयोगात् वमन्तात् ॥ ६ । ४ । १३७ ॥
Fully stated, वमन्तात् संयोगात् अनः अल्लोपः न ।

The अ of अन् following a conjunct consonant ending in व् or म् is not elided. This bars अल्लोपोऽनः ॥ ६ । ४ । १३४ ॥ and विभाषा ङि० – ॥ ६ । ४ । १३६ ॥

Thus अध्वन्+शस् = अध्वनः ।
अध्वन्+ङि = अध्वनि । (The rules ६ । ४ । ८ ॥ ८ । २ । ७ ॥ apply)

अध्वन् पुं० – अध्वा अध्वानौ अध्वानः । अध्वानम् अध्वानौ अध्वनः ।
अध्वना अध्वभ्याम् अध्वभिः । अध्वने अध्वभ्याम् अध्वभ्यः । अध्वनः अध्वभ्याम् अध्वभ्यः । अध्वनः अध्वनोः अध्वनाम् । अध्वनि अध्वनोः अध्वसु ।
संबो० हे अध्वन् अध्वानौ अध्वानः ।
आत्मन् पुं० is declined in the same way.
पर्वन् नपुं० – पर्व पर्वणी* पर्वाणि । पर्व पर्वणी पर्वाणि ।
पर्वणा पर्वभ्याम् etc. (Same as नामन्).
चर्मन् नपुं० is declined in the same way.

For मूर्धन् पुं० the conjunct consonant preceding अन् does not end in व् or म्. The rule न संयोगात्० – ॥ does not apply. The declension is the same as of राजन् – मूर्धा मूर्धानौ मूर्धानः; मूर्ध्नः; मूर्धनि or मूर्ध्नि; हे मूर्धन् ।

3. अहन् नपुं० A day.

अहन्+सु = अहन् । स्वमोर्नपुं० – ॥ ७ । १ । २३ ॥
= अहर् । रोऽसुपि – See below (i)
= अहः । खरवसा० – ॥ ८ । ३ । १५ ॥

(i) रोऽसुपि ॥ ८ । २ । ६९ ॥
Fully stated, अहन् पदस्य रः असुपि ।

When no विभक्ति follows, न् of अहन् is replaced by र्. This applies to अहन् only in the प्र० and द्वि० एकवचन.‡

अहन्+शी = अहनी or अह्नी । विभाषा० – ॥ ६ । ४ । १३६ ॥
अहन्+शि = अहानि । सर्वनामस्थाने० – ॥ ६ । ४ । ८ ॥
अहन्+टा = अह्ना । अल्लोपो० – ॥ ६ । ४ । १३४ ॥

---

* No optional elision of अ.

‡ This also applies to अहन् appearing in a compound. When न् is replaced by र्, the rules applicable to रु – र् (उ इत्) do not hold.
अहरहः – Day by day. (The rule अतो रो० – ॥ ६ । १ । ११३ does not apply)
अहरागमः – The approach of day. (भो भगो० – ॥ ८ । ३ । १७ ॥ does not apply)
अहर्मुखम् – Dawn. (हशि च ॥ ६ । १ । ११४ ॥ does not apply.)

अहन्+भ्याम् = अहर्+भ्याम् । न् is replaced by रु – see below (ii)
= अहउ+भ्याम् । र् is replaced by उ – हशि च ॥ ६ । १ । ११४ ॥
= अहोभ्याम् । अ+उ = ओ – आद्गुणः ॥ ६ । १ । ८७ ॥

(ii) अहन् ॥ ८ । २ । ६८ ॥

Fully stated, अहन् पदस्य रुः ।

The final of अहन्, when it is a पद, is replaced by रु – र् (उ इत्). अहन् is a पद before भ्याम्, भिस्, भ्यस् and सुप्.

अहन्+सुप् = अहर्+सु । र् by अहन् ॥ ८ । २ । ६८ ॥
= अहः +सु । रोः सुपि ॥ ८ । ३ । १६ ॥*
= अहःसु or अहस्सु । वा शरि ॥ ८ । ३ । ३६ ॥ (I, 20)

अहन् नपुं० – अहः अहनी-ह्नी अहानि । अहः अहनी-ह्नी अहानि । अह्ना अहोभ्याम् अहोभिः । अह्ने अहोभ्याम् अहोभ्यः । अह्नः अहोभ्याम् अहोभ्यः । अह्नः अह्नोः अह्नाम् । अहनि-अह्नि अह्नोः अहःसु-स्सु । संबो० – हे अहः अहनी-ह्नी अहानी ।

4. शशिन् पुं० The moon, (lit.) containing a hare.
वृत्रहन् पुं० A name of Indra, (lit.) killer of वृत्र.
पूषन् पुं० The sun.
अर्यमन् पुं० The sun, the head of the Manes.
सुखिन् वि० Happy. (सुखिनी स्त्री०)

(i) इन्हन्पूषार्यम्णां शौ ॥ ६ । ४ । १२ ॥

(ii) सौ च ॥ ६ । ४ । १३ ॥

Fully stated, इन् – हन् – पूषार्यम्णाम् अङ्गस्य उपधायाः दीर्घः शौ असंबुद्धौ सौ च ।

The penultimate of bases ending in इन् and हन् and of पूषन् and अर्यमन् is lengthened before शि – the neuter first and second triplicate plural ending and सु –(not संबुद्धि)

These two सूत्रs occur later than the सूत्र सर्वनामस्थाने० – ॥ ६ । ४ । ८ ॥ and hence are of greater force. In the case of these bases, therefore, the penultimate vowel is lengthened only before शि and सु of the सर्वनामस्थान affixes.

शशिन्+सु = शशीन्+सु । सौ च ॥ ६ । ४ । १३ ॥
= शशीन् । हल्ङ्या० – ॥ ६ । १ । ६८ ॥
= शशी । नलोपः० – ॥ ८ । २ । ७ ॥

For the rest, शशिनौ शशिनः etc.
शशिन्+भ्याम् = शशिभ्याम् । नलोपः० – ॥

* रु is replaced by विसर्जनीय before सु, the स० बहु० – this does not apply to any other र्.

For संबुद्धि – हे शशिन् – इ is not lengthened, and न् is not elided – न ङिसंबुद्ध्योः ॥ ८ । २ । ८ ॥

शशिन् पुं० – शशी शशिनौ शशिनः । शशिनम् शशिनौ शशिनः । शशिना शशिभ्याम् शशिभिः । शशिने शशिभ्याम् शशिभ्यः । शशिनः शशिभ्याम् शशिभ्यः । शशिनः शशिनोः शशिनाम् । शशिनि शशिनोः शशिषु । हे शशिन् ।

वृत्रहन्+सु = वृत्रहान्+स् । सौ च ॥ ६ । ४ । १३ ॥
= वृत्रहान् । हल्ङ्या० – ॥ ६ । १ । ६८ ॥
= वृत्रहा । नलोपः० – ॥ ८ । २ । ७ ॥
वृत्रहन्+औ = वृत्रहणौ । न् is replaced by ण्. See below (iii)

(iii) एकाजुत्तरपदे णः ॥ ८ । ४ । १२ ॥

Fully stated, पूर्वपदात् रषाभ्याम् एकाजुत्तरपदे प्रातिपदिकान्तनुम्विभक्तिषु नो णः ।

In a compound when र् or ष् (also ऋ) occur in the first member and the second member consists of a single vowel, न् occurring at the end of a प्रातिपदिक base or belonging to the augment नुम् or a सुप् affix is replaced by ण्.

वृत्रहन् – वृत्रं हतवान् इति – is an उपपद समास of which the first member वृत्र contains र्, the second member हन् has a single vowel and न् occurs at the end of a प्रातिपदिक base.

Similarly, वृत्रहणः, वृत्रहणम्, वृत्रहणौ ।

वृत्रहन्+शस् = वृत्रह् न्+अस् । अल्लोपो० – ॥ ६ । ४ । १३४ ॥
= वृत्रघ्न्+अस् । ह् is replaced by घ् - See below (iv)
= वृत्रघ्नः ।

(iv) हो हन्तेर्ञ्णिन्नेषु ॥ ७ । ३ । ५४ ॥

Fully stated, हन्तेः हः कु ञ्णिन्नेषु ।

ह् in the root हन् is replaced by its corresponding guttural 'घ्' before an affix which is ञित् or णित् or before न्.

It should be noted that न् in हन् is not replaced by ण् –

(v) हन्तेरत्पूर्वस्य ॥ ८ । ४ । २२ ॥

This should be split in two parts –

हन्तेः ॥ – उपसर्गात् हन्तेः नः णः ।

The न् of हन् will be replaced by ण् preceded by an उपसर्ग competant to cause the change – प्रहण्यते ।

अत्पूर्वस्य ॥

The न् of हन् will be replaced by ण् only if preceded by the short अ – अत्.

In वृत्रघ्नः, न् of हन् is not preceded by any उपसर्ग containing र् nor by a short अ.

Also प्रघ्नन्ति – उपसर्ग 'प्र' contains र् but न् is not preceded by a short अ.

वृत्रहन् पुं० – वृत्रहा वृत्रहणौ वृत्रहणः । वृत्रहणम् वृत्रहणौ वृत्रघ्नः । वृत्रघ्ना वृत्रहभ्याम् वृत्रहभिः । वृत्रघ्ने वृत्रहभ्याम् वृत्रहभ्यः । वृत्रघ्नः वृत्रहभ्याम् वृत्रहभ्यः । वृत्रघ्नः वृत्रघ्नोः वृत्रघ्नाम् । वृत्रहणि–वृत्रघ्नि* वृत्रघ्नोः वृत्रहसु । हे वृत्रहन् वृत्रहणौ वृत्रहणः ।

पूषन् पुं० – पूषा पूषणौ पूषणः । पूषणम् पूषणौ पूष्णः । पूष्णा पूषभ्याम् etc. पूष्णे । पूष्णः । पूष्णोः । पूष्णाम । पूषणि or पूष्णि । पूषसु । हे पूषन् ।

अर्यमन् पुं० – अर्यमा अर्यमणौ अर्यमणः etc. (Similar to पूषन्)

सुखिन् पुं० – सुखी सुखिनौ सुखिनः etc. (Similar to शशिन्) .

सुखिनी is a नदी base and will be declined like गौरी (II, 10)

सुखिन् नपुं० –

सुखिन्+सु = सुखि । स्वमोर्न० – ॥ ७ । १ । २३ ॥ नलोपः० – ॥ ८ । २ । ७ ॥

सुखिन्+शी = सुखिनी ।

सुखिन्+शि = सुखीनि । इन्हन्पूषा० – ॥ ६ । ४ । १२ ॥ उपधादीर्घः ।

सुखिना etc. – the rest like the masculine base.

5. श्वन् पुं० A dog.

युवन् वि० Youthful, young. (स्त्री० युवति)

मघवन् पुं० A name of Indra, (lit.) possessing gifts.

(i) श्वयुवमघोनामतद्धिते ॥ ६ । ४ । १३३ ॥

Fully stated, श्व–युव–मघोनां भस्य अतद्धिते संप्रसारणम् ।

संप्रसारण takes place in the case of श्वन्, युवन् and मघवन् when they are भ bases, provided not followed by a तद्धित affix. Among the सुप् affixes, these will be treated as 'भ' before शस्, टा, ङे etc. (यचि भम् ॥ १ । ४ । १८ ॥ Ref. Chap. III)

For संप्रसारण, the preceding व् is replaced by उ – इग् यणः संप्रसारणम् । १ । १ । ४५ ॥ (I, 14)

श्वन्+सु = श्वा । श्वानौ, श्वानः, श्वानम्, श्वानौ ।

श्वन्+शस् = श् उ अ न्+अस् । संप्रसारण ।

= श् उ न्+अस् । उ+अ = उ ।‡

= शुनः ।

Similarly, शुना, शुने etc. (श्वभ्याम्, श्वसु, हे श्वन्)

---

* विभाषा ङिश्योः ॥ ६ । ४ । १३६ ॥

‡ संप्रसारणाच्च ॥ ६ । १ । १०८ ॥ पूर्वरूपमेकादेशः । (I, 14)

युवन् पुं० – युवा युवानौ etc.; यूनः यूना etc.; युवभ्याम् युवसु; हे युवन् ।
युवति स्त्री० is declined like मति*.
युवन् नपुं० – युव यूनी युवानि etc.
यूना etc. – the rest like the masculine base.
मघवन् पुं० – मघवा मघवानौ मघवानः । मघवानम् मघवानौ मघोनः । मघोना मघवभ्याम् etc.
मघवन् is optionally declined as follows –

(ii) मघवा बहुलम् ।। ६ । ४ । १२८ ॥
Fully stated, मघवा अङ्गस्य तृ बहुलम् ।

The final of मघवन् is often replaced by तृ – त् (ऋ इत्). Thus मघवन् becomes मघवत्.

मघवत् + सु = मघवन्त् + सु ।	The augment नुम् – See below (iii)
= मघवन्त् ।	हल्ङ्या० – ॥ ६ । १ । ६८ ॥
= मघवन् ।	संयोगान्त० – ॥ ८ । २ । २३ ॥
= मघवान ।‡	The penultimate is lengthened – सर्वनामस्था० – ॥ ६ । ४ । ८ ॥

(iii) उगिदचां सर्वनामस्थानेऽधातो ॥ ७ । १ । ७० ॥
Fully stated, अधातोः उगिदचाम् अङ्गस्य नुम् सर्वनामस्थाने ।

Followed by a सर्वनामस्थान affix, the augment नुम् – न् (उ म् इत्) is added (immediately after the last vowel) to bases having the indicatory उ, ऋ and ऌ (उक्), other than roots and the stem अच् (अञ्चु)§

* यूनस्तिः ॥ ४ । १ । ७७ ॥
The feminine affix ति is added to युवन् and it is regarded as a तद्धित affix. This bars ङीप् due by the general rule ऋन्नेभ्यः ङीप् ॥ ४ । १ । ५ ॥
युवन् + ति = युवति । नलोपः० – ॥ ८ । २ । ७ ॥

‡ In मघवान् the final न् will not be elided by नलोपः० ॥ ८ । २ । ७ ॥
त् in मघवन्त् has been elided by संयोगान्त० – ॥ ८ । २ । २३ ॥ which is later to नलोपः० ॥ ८ । २ । ७ ॥
The त् elision is असिद्ध for the application of the preceding सूत्र – पूर्वत्रासिद्धम् ॥

§ It should be noted that there are also उगित् roots – स्रंसु, ध्वंसु, याचृ, बाधृ, गम्ऌ, पत्ऌ etc. This rule does not apply to bases ending in such roots e. g. उखास्रस्, पर्णध्वस् etc. (Ref. Chap. XIII)
Among उगित् roots only अञ्चु comes under the scope of this rule when it has dropped its nasal (Ref. Chap. XIII)

मघवत् – मघवान् मघवन्तौ मघवन्तः । मघवन्तम् मघवन्तौ मघवतः । मघवता मघवद्भ्याम् etc.
(मघवत्सु, हे मघवन्)

6. अर्वन् पुं० A horse, a courser.
अर्वणस्त्रसावनञः ॥ ६ । ४ । १२७ ॥

The final of the base अर्वन्, not preceded by the particle नञ्, is replaced by तृ-त् (ऋ इत्) but not before the affix 'सु'.

The base remains अर्वन् before सु. It becomes अर्वत् before the rest of the सर्वनामस्थान affixes and takes the augment नुम्.

अर्वा अर्वन्तौ अर्वन्तः । अर्वन्तम् अर्वन्तौ अर्वतः । अर्वता अर्वद्भ्याम् etc. (अर्वत्सु, हे अर्वन्)
Preceded by नञ् – अनर्वन् विशे० Irresistable.
It will be declined like अध्वन् – अनर्वा, अनर्वाणौ etc.

7. पथिन् पुं० A road, a course.
मथिन् पुं० A churning stick.
ऋभुक्षिन् पुं० The lord of ऋभुs, a name of Indra.

(i) पथिमथ्यृभुक्षामात् ॥ ७ । १ । ८५ ॥
Fully stated, पथि – मथि – ऋभुक्षाम् अङ्गस्य आत् सौ ।

The final of पथिन् etc. is replaced by आत् before 'सु'

(ii) इतोऽत् सर्वनामस्थाने ॥ ७ । १ । ८६ ॥
Fully stated, पथि – मथि – ऋभुक्षाम् इतः अत् सर्वनामस्थाने ।

The इ in पथिन् etc. is replaced by अ (short) before a सर्वनामस्थान affix.

(iii) थोऽन्थः ॥ ७ । १ । ८७ ॥
Fully stated, पथि–मथोः थः न्थः सर्वनामस्थाने ।

The थ् in पथिन् and मथिन् is replaced by न्थ् before a सर्वनामस्थान affix.

पथिन्+सु	= पथि आ+सु ।	न् is replaced by आ – ७ । १ । ८५ ॥
	= पथ् अ आ+सु ।	इ is replaced by अ – ७ । १ । ८६ ॥
	= पन्थ् अ आ+सु ।	थ् is replaced by न्थ् – ७ । १ । ८७ ॥
	= पन्थाः ।	
पथिन्+औ	= पथन्+औ ।	इतोऽत्० – ॥ ७ । १ । ८६ ॥
	= पन्थन्+औ ।	थोऽन्थः ॥ ७ । १ । ८७ ॥
	= पन्थानौ ।	The penultimate is lengthened सर्वनामस्था० – ॥ ६ । ४ । ८ ॥

पन्थानः । पन्थानम् । पन्थानौ ।
पथिन्+शस् = पथ्+अस् । The टि 'इन्' is elided–see below (iv)
= पथः ।

(iv) भस्य टेर्लोपः ॥ ७ । १ । ८८ ॥

Fully stated, पथि – मथि – ऋभुक्षां भस्य टेः लोपः ।

The टि portion* of पथिन्, मथिन् and ऋभुक्षिन् is elided when they are 'भ' i. e. before the affixes शस्, टा, ङे, ङसि, ङस्, ओस्, आम्, ङि & ओस्.

पथिन् – पन्थाः पन्थानौ पन्थानः । पन्थानम् पन्थानौ पथः । पथा पथिभ्याम् etc. (पथिषु हे पन्थाः)

मथिन् – मन्थाः मन्थानौ मन्थानः । मन्थानम् मन्थानौ मथः । मथा मथिभ्याम् etc. (मथिषु, हे मन्थाः)

ऋभुक्षिन् – ऋभुक्षाः, ऋभुक्षाणौ ऋभुक्षाणः । ऋभुक्षाणम् ऋभुक्षाणौ ऋभुक्षः । ऋभुक्षा ऋभुक्षिभ्याम् etc. (ऋभुक्षिषु, हे ऋभुक्षाः)

8. अस्थि नपुं॰ A bone.
दधि नपुं॰ Coagulated milk.
सक्थि नपुं॰ The thigh, the pole of a cart.
अक्षि नपुं॰ The eye.

अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः ॥ ७ । १ । ७५ ॥

Fully stated, अस्थि – दधि – सक्थि – अक्ष्णां तृतीयादिषु अचि विभक्तौ अनङ् उदात्तः ।

अनङ् – अन् (अ ङ् इत्) is substituted for the final इ of अस्थि, दधि, सक्थि and अक्षि before the affixes of the third triplicate and those following, which begin with a vowel (टादौ अचि) and it is moreover considered उदात्त (टा, ङे, ङसि, ङस्, ओस्, आम्, ङि, ओस्)

अस्थि नपुं॰ – अस्थि अस्थिनी अस्थीनि etc. अस्थ्ना अस्थिभ्याम् etc. अस्थनि or अस्थ्नि (६ । ४ । १३६ ॥) । अस्थिषु । हे अस्थे or अस्थि (optionally ह्रस्वस्य गुणः ॥ ७ । ३ । १०८ ॥ II, 4)

दधि नपुं॰ – दधि दधिनी दधीनि; दध्ना दधिभ्याम् etc.

सक्थि नपुं॰ – सक्थि सक्थिनी सक्थीनि; सक्थ्ना सक्थिभ्याम् etc.

अक्षि नपुं॰ – अक्षि अक्षिणी अक्षीणि; अक्ष्णा अक्षिभ्याम् etc.

Examples :

यथा राजा तथा प्रजा ।
मरणं प्रकृतिः शरीरिणाम् ।
वरमेको गुणी पुत्रो न च मूर्खशतान्यपि ।
श्वा यदि क्रियते राजा स किं नाऽश्नात्युपानहम् ।
योगी भस्मना ललाटे त्रिपुण्ड्रं रचयति ।
विश्वकर्मा वृत्रघ्ने मुनेरस्थिभिः कुलिशमसृजत् ।
साम्ना दानेन भेदेन दण्डेनाऽरिं प्रसाधयेत् ।
उद्धरेदात्मनाऽऽत्मानं नाऽऽत्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥
स्थान एव नियोज्यन्ते भृत्याश्चाऽऽभरणानि च ।
न हि चूडामणिः पादे नूपुरं मूर्ध्नि धार्यते ॥

—•—•—

* अचोऽन्त्यादि टि ॥ १ । १ । ६४ ॥

CHAPTER X

Roots of the अदादि class.

(लट् - लङ् - लोट् - विधिलिङ्)

1. Roots belonging to the द्वितीय गण are known as अदादि after the root अद भक्षणे which leads the group in the धातुपाठ.

The general विकरण प्रत्यय शप् (कर्तरि शप् ॥ ३ । १ । ६८ ॥) is elided for the अदादि class by अदिप्रभृतिभ्य: शप: ॥ २ । ४ । ७२ ॥
Fully stated – अदिप्रभृतिभ्य: शप: लुक् स्यात् ।

The affix शप् (which should have accrued with तिङ् affixes following) is elided after the roots of the अदादि class and the तिङ् affixes for लट्, लङ्, लोट् and विधिलिङ् are directly added.

The तिङ् affixes are enumerated in Chap. 1, Sec. 8, being पित् or ङित् as indicated.

2. अद भक्षणे अदादि प० प० अद् to eat, to consume.

लट् ।

अद्+शप्+ति = अद्+ति = अत्ति । खरि च ॥ ८ । ४ । ५५ ॥ (II, 8)

अत्ति अत्तः अदन्ति । अत्सि अत्थः अत्थ । अद्मि अद्वः अद्मः ।

लङ् ।

The augment आट् by the rule आडजादीनाम् ॥ ६ । ४ । ७२ ॥

अदः सर्वेषाम् ॥ ७ । ३ । १०० ॥

Fully stated, अदः सार्वधातुके हलि अपृक्ते अट् सर्वेषाम् (आचार्याणां मतेन) ।

Coming after अद्, a सार्वधातुक affix consisting of a single consonant (अपृक्त) takes the augment अट्.

आ+अद्+त् = आ+अद्+अत् । The augment अट् – आद्यन्तौ० – ॥ १ । १ । ४६ ॥
= आदत् ।

आ+अद्+स् = आ+अद्+अस् = आदः ।

आदत् आत्ताम् आदन् । आदः आत्तम् आत्त । आदम् आद्व आद्म ।

लोट् ।

The म० पु० एक० affix हि is replaced by धि – हुझल्भ्यो हेर्धिः ॥ ६ । ४ । १०१ ॥ (Chap. VIII)

अत्तु अत्ताम् अदन्तु । अद्धि अत्तम् अत्त । अदानि अदाव अदाम ।

विधिलिङ् ।

अद्यात् अद्याताम् अद्युः । अद्याः अद्यातम् अद्यात । अद्याम् अद्याव अद्याम ।

3. अस् भुवि अदा० प० प० अस् to be, to exist.

लट् ।

अस्+ति = अस्ति ।

अस्+तस् = स्तः । अ is elided before तस् which is ङित् – श्नसोरल्लोपः ॥ ६ । ४ । १११ ॥ (VIII)

अस्+अन्ति = सन्ति । श्नसो० – ॥ ६ । ४ । १११ ॥

अस्+सि = असि । स् of अस् is elided – see below (i)

(i) तासस्त्योर्लोपः ॥ ७ । ४ । ५० ॥

Fully stated, तासस्त्योः सः सि लोपः ।

The स् of तास् (for लुट्) and of the root अस् is elided before an affix beginning with स्.*

अस्ति स्तः सन्ति । असि स्थः स्थ । अस्मि स्वः स्मः ।

लङ् ।

The augment आट् by आडजादीनाम् ॥ ६ । ४ । ७२ ॥

(ii) अस्तिसिचोऽपृक्ते ॥ ७ । ३ । ९६ ॥

Fully stated, अस्तिसिचः अपृक्ते हलि सार्वधातुके ईट् ।

A सार्वधातुक affix consisting of a single consonant (अपृक्त) takes the augment ईट् after the root अस् and a root-base formed with the affix सिच् (for लुङ्).

आ + अस् + त् = आ + अस् + ईत् । The augment ईट्.

= आसीत ।

आ + अस् + स् = आ + अस् + ईस् = आसीः ।

आसीत् आस्ताम् आसन् । आसीः आस्तम् आस्त । आसम् आस्व आस्म ।

लोट् ।

The म० पु० एकवचन affix हि is replaced by धि – हुझल्भ्यो० – ॥ ६ । ४ । १०१ ॥

Further the स् of अस् is replaced by ए before हि, See below (iii)

(iii) घ्वसोरेद्धावभ्यासलोपश्च ॥ ६ । ४ । ११९ ॥

Fully stated, घ्वसोः एत् हौ अभ्यासलोपः च ।

The finals of the घु roots (दा & धा) and the root अस् is replaced by ए before the लोट् affix हि, also the reduplicated syllable (अभ्यास) of दा and धा is further elided.‡

---

* For लुट् and लुङ् refer Book IV.

‡ For घु rooes refer Chap. XIII.

Thus, अस् + हि = अस् + धि । हुझल्भ्यो० – ॥ ६ । ४ । १०१ ॥
= स् + धि । श्नसो० – ॥ ६ । ४ । १११ ॥
= ए + धि । घ्वसो० – ॥ ६ । ४ । ११९ ॥
= एधि ।

अस्तु स्ताम् सन्तु । एधि स्तम् स्त । असानि असाव असाम ।

विधिलिङ् ।

स्यात् स्याताम् स्यु: । स्या: स्यातम् स्यात । स्याम् स्याव स्याम ।

The root अस् is प० प० but in the following cases it takes आ० प० affixes

(iv) कर्तरि कर्मव्यतिहारे ॥ १ । ३ । १४ ॥

Fully stated, कर्तरि कर्मव्यतिहारे आत्मनेपदम् ।

आ० प० affixes are used to indicate the agent when there is interchange or reciprocity of action.

With वि and अति, व्यति+अस् to be in exchange for, to surpass or excel.

व्यति+अस्+ते = व्यतिस्ते । अ is elided – श्नसो० – ॥ ६ । ४ । १११ ॥ (Chap. VIII)

व्यति+अस्+आते = व्यति+स्+आते ।
= व्यतिषाते । स is replaced by ष् – see below (v)

(v) उपसर्गप्रादुर्भ्यामस्तिर्यच्परः ॥ ८ । ३ । ८७ ॥

Fully stated, उपसर्गप्रादुर्भ्याम् अस्तिः यच्परः सः मूर्धन्यः ।

Preceded by an उपसर्ग containing इ or उ, and the गति indeclinable प्रादुस्, the स् of अस् is replaced by ष् provided it is followed by य् or a vowel.

With प्रादुस् – प्रादुरस्ति, प्रादुःस्तः, प्रादुःषन्ति, प्रादुःष्यात् ।

व्यति+अस्+से = व्यति+स्+से । श्नसो० – ॥ ६ । ४ । १११ ॥
= व्यति+से । तासस्त्यो० – ॥ ५ । ४ । ५० ॥
= व्यतिसे । This स् does not belong to the root अस्. It will not be replaced by ष्.

व्यतिषाथे ।

व्यति+अस्+ध्वे = व्यति+स्+ध्वे ।
= व्यतिध्वे । स् elided by धि च ॥ ८ । २ । २५ ॥ (Chap. VIII)

व्यति+अस्+ए = व्यति+स्+ए ।
= व्यतिहे । स् is replaced by ह् – see below (vi)

(vi) ह एति ॥ ७ । ४ । ७२ ॥

Fully stated, तासस्त्योः सः ह एति (परतः) ।

The स् of the affix तास् and the root अस् is replaced by ह् followed by ए.

व्यतिस्ते व्यतिषाते व्यतिषते । व्यतिसे व्यतिषाथे व्यतिध्वे । व्यतिहे व्यतिस्वहे व्यतिस्महे ।

लङ् – व्यत्यास्त । लोट् – व्यतिस्ताम् । विधि० – व्यतिषीत ।

4. आस उपवेशने अदा आ० प० आस् to sit or rest, to be present..

लट् – आस्ते आसाते आसते । आस्से आसाथे आध्वे* । आसे आस्वहे आस्महे ।

लङ् – आस्त आसाताम् आसत etc.

लोट् – आस्ताम् आसाताम् आसताम् etc.

विधि० – आसीत आसीयाताम आसीरन् etc.

शास् with the उपसर्ग 'आ' – to desire or expect, to bless.

आङः शासु इच्छायाम् अदा० आ० प०‡ (Also with प्र)

लट् – आशास्ते । लङ् – आशास्त । लोट् – आशास्ताम् । विधि० – आशासीत ।

वस आच्छादने अदादि आ० प० वस् to wear.

लट् – वस्ते । लङ् – अवस्त । लोट् – वस्ताम् । विधि० – वसीत ।

5. वच परिभाषणे अदा० प० प० वच् to speak.

लट् ।

वक्ति वक्तः वचन्ति । वक्षि वक्थः वक्थ । वच्मि वच्वः वच्मः ।

लङ् – अवक्-ग्§ अवक्ताम् अवचन् etc.

लोट् – वक्तु वक्ताम् वचन्तु etc.

विधि० – वच्यात् वच्याताम् वच्युः etc.

6. वृजी वर्जने अदा० आ० प० वृज् to avoid, to shun.

Also रुधा० प० प० and चुरा० युजादि.

पृची सम्पर्चने अदा० आ० प० पृच् to come in contact with.

णिजि शुद्धौ अदा० आ० प० निञ्ज् to wash or cleanse.†

शिजि अव्यक्ते शब्दे अदा० आ० प० शिञ्ज् to tinkle.

---

* स् is elided by धि च ॥ ८ । २ । २५ ॥ (Chap. VIII)

‡ There is another root शासु अनुशिष्टौ अदा० प० प० which belongs to the अभ्यस्त group (Explained later in Sec. 21)

§ वाऽवसाने ॥ ८ । ४ । ५६ ॥ (II, 19)

† इदितो नुम्धातोः ॥ ७ । १ । ५८ ॥ (I, 6)

	लङ्	लोट्	विधि०:
वृज् – वृक्ते	अवृक्त	वृक्ताम्	वृजीत
पृच् – पृक्ते	अपृक्त	पृक्ताम्	पृचीत
निञ्ज् – निङ्क्ते	अनिङ्क्त	निङ्क्ताम्	निञ्जीत
शिञ्ज् – शिङ्क्ते	अशिङ्क्त	शिङ्क्ताम्	शिञ्जीत

लट् । (column heading of the first column)

7. मृजुष् शुद्धौ अदा० प० प० मृज् to wipe off, to sweep.

(i) मृजेर्वृद्धिः ।। ७ । २ । ११४ ।।

Fully stated, मृजेः अङ्गस्य इकः वृद्धिः ।

The इक् (इ, उ, ऋ, ऌ) in मृज् (i. e. ऋ) takes its वृद्धि substitute before an affix (applicable to roots only) which is not कित् or ङित्.

मृज्+ति = मार्ज्+ति । (वृद्धि)
= मार्ष्+ति । ज् is replaced by ष् - व्रश्चभ्रस्ज० - ।। ८ । २ । ३६ ।। (Chap. III)
= मार्ष्टि । ष्टुनाष्टुः ।। ८ । ४ । ४१ ।। (I, 20)
मृज्+तस् = मृष्टः । तस् is ङित् – no वृद्धि.
मृज्+अन्ति = मृजन्ति or मार्जन्ति । वृद्धि is optional - see below (ii)

(ii) क्ङित्यजादौ वेष्यते ।। (वा०)

वृद्धि is optional when the following affix, though ङित् or कित्, is अजादि i. e. begins with a vowel.

लट् –
मार्ष्टि मृष्टः मृजन्ति or मार्जन्ति । मार्क्षि मृष्ठः मृष्ठ । मार्जिम मृज्वः मृज्मः ।

लङ् –
अ+मृज्+त् = अ+मार्ज्+त । वृद्धि ।
= अ+मार्ज् । हल्ङ्या० - ।। ६ । १ । ६८ ।। (II, 8)
= अ+मार्ष् । व्रश्चभ्रस्ज० - ।। ८ । २ । ३६ ।। (Ch. III)
= अ+मार्ड् । झलां जशो० - ।। ८ । २ । ३९ ।। (II, 3)
= अमार्ट्-र्ड् । वाऽवसाने ।। ८ । ४ । ५६ ।। (II, 19)

The rule संयोगान्तस्य लोपः ।। (Chap. I) does not apply as only स् following र् is elided by रात्सस्य ।। ८ । २ । २४ ।। (II, 14)

अमार्ट्-र्ड् अमृष्टाम् अमृजन्-अमार्जन् । अमार्ट्-र्ड् अमृष्टम् अमृष्ट । अमार्जम् अमृज्व अमृज्म ।

लोट् – मार्ष्टु मृष्टाम् मृजन्तु-मार्जन्तु । मृड्ढि etc.

विधि० – मृज्यात् मृज्याताम मृज्युः etc.

8. द्विष अप्रीतौ अदा० उ० प० द्विष् to hate.

* This root is replaced by ख्याञ् before आर्धधातुक affixes.

चक्षिङ् व्यक्तायां वाचि दर्शनेऽपि अदा० आ० प० चक्ष् to speak, to see.
वश कान्तौ अदा० प० प० वश् to desire, to like.
द्विष् – लट् प० प० द्वेष्टि द्विष्टः द्विषन्ति etc.
आ० प० द्विष्टे द्विषाते द्विषते etc.
लङ् प० प० अद्वेट्–ड् अद्विष्टाम् अद्विषन or अद्विषुः । etc. (See below – द्विषश्च)
द्विषश्च ॥ ३ । ४ । ११२ ॥ – द्विषः च लङः शाकटायनस्य एव झेः जुस् ।

According to शाकटायन the affix झि for लङ् is replaced by जुस् after द्विष्. Hence the application of the rule is optional.

आ० प० अद्विष्ट अद्विषाताम् अद्विषत । etc.
लोट् – प० प० द्वेष्टु द्विष्टाम् द्विषन्तु etc. (द्विड्ढि)
आ० प० द्विष्टाम् द्विषाताम् द्विषताम् etc.
विधि० – प० प० द्विष्यात् द्विष्याताम् द्विष्युः etc.
आ० प० द्विषीत द्वीषीयाताम् द्विषीरन etc.

चक्ष् आ० प०
चक्ष्+ते = च+ष्+ते । स्कोः संयो० – ॥ ८ । २ । २९ ॥ (Chap. I)
= च+ष्+टे । ष्टुना० – ॥ ८ । ४ । ४१ ॥ (I, 20)
= चष्टे । चक्षाते । चक्षते ।
चक्ष्+से = च+ष्+से । स्कोः संयो० – ॥ ८ । २ । २९ ॥
= च+क्+से । षढोः कः सि ॥ ८ । २ । ४१ ॥ (Ch. V)
= च+क्+षे । आदेशप्रत्य० – ॥ ८ । ३ । ५९ ॥ (I, 17)
= चक्षे । चक्षाथे ।
चक्ष्+ध्वे = च+ष्+ध्वे । स्कोः संयो० – ॥ ८ । २ । २९ ॥
= च+ड+ध्वे । झलां जश्झशि ॥ ८ । ४ । ५३ ॥ (I, 14)
= चड्ढ्वे । ष्टुना० – ॥ ८ । ४ । ४१ ॥
चष्टे चक्षाते चक्षते । चक्षे चक्षाथे चड्ढ्वे । चक्षे चक्ष्वहे चक्ष्महे ।
लङ् – अचष्ट अचक्षाताम् अचक्षत etc.
लोट् – चष्टाम् चक्षाताम् चक्षताम् etc.
विधि० – चक्षीत चक्षीयाताम् चक्षीरन् etc.

वश् प० प०
वश्+ति = वष्+ति । व्रश्चभ्रस्ज० – ॥ ८ । २ । ३६ ॥
= वष्टि । ष्टुना० – ॥ ८ । ४ । ४१ ॥
वश+तस् = वष्+तस् । व्रश्चभ्रस्ज० – ॥ ८ । २ । ३६ ॥
= उष+तस् । संप्रसारण by ग्रहिज्या० – ॥ ६ । १ । १६ ॥ (I, 14)
= उष्टः । ष्टुना० – ॥ ८ । ४ । ४१ ॥
वश्+अन्ति = उशन्ति । संप्रसारण ।

वष्टि उष्टः उशन्ति । वक्षि etc.

लङ् – अवट्-ड् औष्टाम्* औशन् etc.

लोट् – वष्ट् उष्टाम् उशन्तु etc.

विधि० – उश्यात् उश्याताम् उश्युः etc.

9. लिह् आस्वादे अदा० उ० प० लिह् to lick, to taste.

दुह प्रपूरणे अदा० उ० प० दुह् to milk.

दिह् उपचये अदा० उ० प० दिह् to anoint.

लिह्+ति = लेह्+ति । पुगन्त० – ॥ ७ । ३ । ८६ ॥

= लेढ्+ति । हो ढः ॥ ८ । २ । ३१ ॥ (Chap. VII)

= लेढ्+धि । झषस्तथो० – ॥ ८ । २ । ४० ॥ (Chap. VIII)

= लेढ्+ढि । ष्टुना० – ॥ ८ । ४ । ४१ ॥

= लेढि । ढो ढे लोपः ॥ ८ । ३ । १३ ॥ (Chap. VIII)

लिह्+तस् = लिढ्+तस् । हो ढः ॥ ८ । २ । ३१ ॥

= लिढ्+धस् । झषस्तथो० – ॥ ८ । २ । ४० ॥

= लिढ्+ढस् । ष्टुना० – ॥ ८ । ४ । ४१ ॥

= लीढः । ढ् is elided by ढो ढे० – ॥ ८ । ३ । १३ ॥ (Chap. VIII)

Preceding इ is lengthened by ढ्रलोपे० – ॥ ६ । ३ । १११ ॥ (II, 4)

लिह्+अन्ति = लिहन्ति ।

लिह्+सि = लेह्+सि । पुगन्त० – ॥ ७ । ३ । ८६ ॥

= लेढ्+सि । हो ढः ॥ ८ । २ । ३१ ॥

= लेक्+सि । षढोः० – ॥ ८ । २ । ४१ ॥

= लेक्षि । आदेशप्रत्य० – ॥ ८ । ३ । ५९ ॥

प० प० – लेढि लीढः लिहन्ति । लेक्षि लीढः लीढ । लेह्मि लिह्वः लिह्मः ।

आ० प० – लीढे लिहाते लिहते etc.

लङ् – प० प० अलेट्–ड् अलीढाम् अलिहन् etc.

आ० प० अलीढ अलिहाताम् अलिहत etc.

लोट् – प० प० लेढु लीढाम् लिहन्तु । लीढि etc.

आ० प० लीढाम् लिहाताम् लिहताम् etc.

विधि० – प० प० लिह्यात् लिह्याताम् लिह्युः etc.

आ० प० लिहीत लिहीयाताम् लिहीरन् etc.

---

* After संप्रसारण, वश् becomes उश्. Being अजादि it will take the augment आट्–आडजादीनाम् ॥ ६ । ४ । ७२ ॥ By आटश्च ॥ ६ । १ । ९० ॥ there will be a single वृद्धि substitute for आ and the succeeding vowel.

दुह् प्रपूरणे ।

दुह् + ति = दोह् + ति । पुगन्त० – ॥ ७ । । ८६ ॥
= दोघ् + ति । दादेर्धातोः० ॥ ८ । २ । ३२ ॥ (Chap, VII)
= दोघ् + धि । झषस्तथो० – ॥ ८ । २ । ४० ॥
= दोग्धि । झलांजश० – ॥ ८ । ४ । ५३ ॥ (I, 14)

दुग्धः । दुहन्ति ।

दुह् + सि = दोह् + सि ।
= दोघ् + सि ।
= धोघ् + सि । एकाचो बशो० – ॥ ८ । २ । ३७ ॥ (Chap. VII)
= धोक् + सि । खरि च ॥ ८ । ४ । ५५ ॥ (II, 3)
= धोक्षि । आदेशप्रत्य० – ॥ ८ । ३ । ५९ ॥

लट् – प० प० दोग्धि दुग्धः दुहन्ति । धोक्षि दुग्धः दुग्ध । दोह्मि दुह्वः दुह्मः ।
आ० प० दुग्धे दुहाते दुहते etc.
लङ् – प० प० अधोक्–ग् अदुग्धाम अदुहन् etc.
आ० प० अदुग्ध अदुहाताम् अदुहत etc.
लोट् – प० प० दोग्धु दुग्धाम् दुहन्तु etc.
आ० प० दुग्धाम् दुहाताम् दुहताम् etc.
विधि० – प० प० दुह्यात् दुह्याताम् दुह्युः etc.
आ० प० दुहीत दुहीयाताम् दुहीरन् etc.

दिह उपचये ।

लट् – प० प० देग्धि दिग्धः दिहन्ति etc.
आ० प० दिग्धे दिहाते दिहते etc.
लङ् – प० प० अधेक्–ग् अदिग्धाम् अदिहन् etc.
आ० प० अदिग्ध अदिहाताम् अदिहत etc.
लोट् – प० प० देग्धु दिग्धाम् दिहन्तु etc.
आ० प० दिग्धाम् दिहाताम् दिहताम् etc.
विधि० – प० प० दिह्यात् दिह्याताम् दिह्युः etc.
आ० प० दिहीत दिहीयाताम् दिहीरन् etc.

10. विद ज्ञाने अदा० प० प० विद् to know, to understand.
लट – वेत्ति वित्तः विदन्ति etc.

Alternately,

(i) **विदो लटो वा ॥ ३ । ४ । ८३ ॥**

Fully stated, विदः लटः वा परस्मैपदानां णल्–अतुस्–उस्–थल्–अथुस्–अ–णल्–व–माः ।

The root विद takes the following affixes optionally for लट् प० प०

प्र० पु० णल्-अ (ण् ल् इत्) अतुस् उस्
म० पु० थल्-अ (थ् ल् इत्) अथुस् अ
उ० पु० णल्-अ (ण् ल् इत्) व म

णल्, थल्, णल् are पित्. the rest are ङित्.
वेद विदतु: विदु: । वेत्थ विदथु: विद । वेद विद्व विद्म ।

लङ् –
(ii) सिजभ्यस्तविदिभ्यश्च ॥ ३ । ४ । १०९ ॥
Fully stated, सिच्–अभ्यस्त–विदिभ्य: च ङित: झे: जुस् ।

The affix झि (प्र० पु० बहु० of a ङित् लकार) is replaced by जुस् for bases ending in सिच् (लुङ्), for an अभ्यस्त base and after the root विद अदा० प० प०

अवेत्-द् अवित्ताम् अविदु: । अवे:*–अवेत्-द् अवित्तम् अवित्त । अविदम् अविद्व अविद्म ।

लोट् ।
वेत्तु वित्ताम् विदन्तु । विद्धि वित्तम् वित्त । वेदानि वेदाव वेदाम ।

Alternately,
(iii) विदांकुर्वन्त्वित्यन्यतरस्याम् ॥ ३ । १ । ४१ ॥

The form विदांकुर्वन्तु is presented optionally. This option applies to all persons and numbers. This irregular form is obtained by adding the affix 'आम्' to the root विद् (no गुण of the penultimate) to which लोट् forms of the root कृञ् are appended.

विदांकरोतु विदांकुरुताम् विदांकुर्वन्तु । विदांकुरु विदाकुरुतम् विदाकुरुत । विदांकरवाणि विदांकरवाव विदांकरवाम ।

विधिलिङ् ।
विद्यात् विद्याताम् विद्यु: etc.

Preceded by सम् the root विद् takes आ० प० affixes – विदिप्रच्छि० – ॥ (वा०) (II, 10)

(iv) वेत्तेर्विभाषा ॥ ७ ।१ । ७ ॥
Fully stated, वेत्ते: झ: अत: विभाषा रुट् ।

The initial augment रुट्–र् (उ ट् इत्) is optionally added to अत् which replaces झ of the affixes added to the verbal stem विद् (वेत्ति).
लट् झे – अते or रते, लङ् झ – अत or रत, लोट् झाम् - अताम् or रताम् ।

---

* दश्च ॥ ८ । २ । ७५ ॥ – धातो: दस्य पदान्तस्य सिपि परे रु: स्यात् वा ।
द् of a root is optionally replaced by रु–र् (उ इत्) coming at the end of a पद before the ending सिप्.

Thus, लट् – संवित्ते संविदाते संविदते or संविद्रते ।
लङ् – समवित्त समविदाताम् समविदत or समविद्रत ।
लोट् – संवित्ताम् संविदाताम् संविदताम् or संविद्रताम् ।

For विधिलिङ् there can be no option for the affix ईरन्.
संविदीत संविदीयाताम् संविदीरन् ।

11. हन हिंसागत्योः अदा॰ प॰ प॰ हन् to kill or strike.

लट् – हन्+ति = हन्ति ।
हन्+तस् = हतः । न् is elided – see below (i)

(i) अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति ।। ६ । ४ । ३७ ।।

The nasal occurring at the end of a base which are enunciated as अनुदात्त in the धातुपाठ (e. g. मन्, हन्, गम्, नम्, यम् and रम्), of the root वन् भ्वा॰ प॰ प॰ and of the roots of the तनादि group, is elided before an affix beginning with a झल् वर्ण which is कित् or ङित्.

हन्+अन्ति = ह् न्+अन्ति । The penultimate अ is elided, see below (ii)
= घ् न्+अन्ति = घ्नन्ति । हो हन्तेः० – ।। ७ । ३ । ५४ ।।

(ii) गमहनजनसनघसां लोपः क्ङित्यनङि ।। ६ । ४ । ९८ ।।
Fully stated, गम–हन–जन–सन–घसाम् अङ्गस्य उपधायाः अनङि अचि क्ङिति लोपः ।

The penultimate अ of गम्, हन्, जन्, सन् and घस् is elided before an अजादि affix, other than अङ् (लुङ्) provided it is कित् or ङित्.

लट् – हन्ति हतः घ्नन्ति । हंसि हथः हथ । हन्मि हन्वः हन्मः ।
लङ् – अहन्* अहताम् अघ्नन् । अहन् अहतम् etc.
लोट् ।

(iii) हन्तेर्जः ।। ६ । ४ । ३६ ।।
हौ – the root हन् is entirely replaced by ज before हि, म॰ पु॰ एक॰ for लोट्.
हन्+हि = ज+हि = जहि ।
हन्तु हताम् घ्नन्तु । जहि हतम् हत । हनानि हनाव हनाम ।
विधिलिङ् – हन्यात् हन्याताम् हन्युः etc.

12. या प्रापणे अदा॰ प॰ प॰ या to go.
लट् – याति यातः यान्ति etc.
लङ् – अयात् अयाताम् अयान् or अयुः etc.
लङः शाकटायनस्यैव ।। ३ । ४ । १११ ।।
Fully stated, आतः लङः झेः जुस् शाकटायनस्य एव ।

* The final न् is not elided as the rule नलोपः० – ।। ८ । २ । ७ ।। applies only to a प्रातिपदिक base,

The प्र० पु० बहु० ending झि for लङ्, coming after a base ending in आ, is replaced by जुस् – उस् (ज् इत्) according to शाकटायन only. Hence the optional form अयान्.

अ+या+जुस् = अ+या+उस्
= अयु: । आ+उ = उ – उस्यपदान्तात् ॥ ६ । १ । ९६ ॥ (Ch. I)

लोट् – यातु याताम् यान्तु etc.
विधि० – यायात यायाताम् यायु: etc.

The following roots are conjugated similarly – ख्या प्रकथने, मा माने भा दीप्तौ, दाप् लवने*, पा रक्षणे‡, श्रा पाके§, ष्णा शौचे† etc.

13. a. वी गतिव्यक्तिप्रजनकान्त्यसनखादनेषु अदा० प० प० वी to go, to pervade. etc.
लट् – वेति वीत: वियन्ति etc. (इय् by अचिश्नु० – ॥ ६ । ४ । ७७ ॥ I, 13)
लङ् – अवेत् अवीताम् अवियन् etc.
लोट् – वेतु वीताम् वियन्तु etc.
विधि० – वीयात् वीयाताम् वीयु: etc.

b. शीङ् स्वप्ने अदा० प० प० शी to sleep.

(i) शीङ: सार्वधातुके गुण: ॥ ७ । ४ । २१ ॥

The final of the base शी takes its गुण substitute followed by a सार्वधातुक affix. This cancels the bar 'क्ङिति च' allowing गुण substitution even before a कित् or ङित् affix provided it is सार्वधातुक.

शी+ते = शेते । पित् affix.
शी+आते = शयाते । ङित् affix.
शी+अते = शी+रते । The augment रुट् – see below (ii)
= शेरते ।

(ii) शीङो रुट् ॥ ७ । १ । ६ ॥

Fully stated, शीङ: अङ्गस्य झ: अत: रुट् ॥

The initial augment रुट् is added to अत् (झ्) after the base शी.

लट् – शेते शयाते शेरते etc.
लङ् – अशेत अशयाताम् अशेरत etc.

---

* This root is specifically excluded from the संज्ञा घु – दाधाघ्वदाप् ॥

‡ The causal form is पालि – the augment लुक् before णिच् by the वार्तिक पातेर्णौ लुग्वक्तव्य: ॥

§ This is a मित् root – the causal form is श्रपि.

† Not preceded by an उपसर्ग this is मित् optionally – causal form is स्नापि or स्नपि.

लोट् – शेताम् शयाताम् शेरताम् etc.
विधि० – शयीत शयीयाताम् शयीरन् etc.

c. षूङ् प्राणिगर्भविमोचने अदा० आ० प० सू to beget or produce.
(दिवा० प्राणिप्रसवे)

भूसुवोस्तिङि ॥ ७ । ३ । ८८ ॥
Fully stated, भूसुवोः अङ्गस्य सार्वधातुके तिङि न गुणः ।

There is no गुण substitution of the finals of the bases consisting of the roots भू and सू, followed by a सार्वधातुक तिङ् affix. Therefore, for the root सू no गुण substitution takes place even before a पित् affix.

लट् – सूते सुवाते सुवते etc. (उव् – अचिश्नु० – ॥ ६ । ४ । ७७ ॥)
लङ् – असूत असुवाताम् असुवत etc.
लोट् – सूताम् सुवाताम् सुवताम् etc.
विधि० – सुवीत सुवीयाताम् सुवीरन् etc.

14. a. इण् गतौ अदा० प० प० इ to go.

लट् – इ+ति = एति । गुण ।
इ+तस् = इतः ।
इ+अन्ति = यन्ति । इणो यण् ॥ – see below.

इणो यण् ॥ ६ । ४ । ८१ ॥
Fully stated, इणः अङ्गस्य अचि यण् ।

The final of the base इ is replaced by य् followed by an अजादि affix. This cancels the सूत्र 'अचिश्नु० – ॥' for the root इण्.

एति इतः यन्ति । एषि इथः इथ । एमि इवः इमः ।

लङ् ।

आ+इ+त् = आ+ए+त् । गुण ।
= ऐत् । आ+ए = ऐ ।
आ+इ+ताम् = ऐताम् । आ+इ = ऐ । आटश्च ॥ ६ । १ । ९० ॥ (II, 9)
आ+इ+अन् = आयन् । इ is replaced by य् – इणो यण् ॥ ६ । ४ । ८१ ॥

ऐत् ऐताम् आयन् । ऐः ऐतम् ऐत । आयम् ऐव ऐम ।
लोट् – एतु इताम् यन्तु etc.
विधि० – इयात् इयाताम् इयुः etc.

b. इक् स्मरणे अदा० प० प० (नित्यमधिपूर्वः) अधि+इ to remember.

इण्वदिक इति वक्तव्यम् ॥ (वा०)
The rules which apply to इण also hold good for इक्. (इणो यण् ॥)

लट् – अध्येति अधीतः अधियन्ति etc.*
लङ् – अध्यैत् अध्यैताम् अध्यायन् etc.
लोट् – अध्येतु अधीताम् अधियन्तु etc.
विधि० – अधीयात् अधीयाताम् अधीयुः etc.
c. इङ् अध्ययने अदा० प० प० अधि + इ to study (नित्यमधिपूर्वः)

The rule इणो यण् does not apply to इङ्. The final vowel is replaced by इय् by अचिश्नु० – ॥

लट् – अधीते अधीयाते‡ अधीयते etc. (अधि + इ = अधी)
लङ् – अध्यैत अध्यैयाताम् अध्यैयत etc. (आ + इ = ऐ – आटश्च ॥)
लोट् – अधीयात् अधीयाताम् अधीयताम् etc.
विधि० – अधीयीय अधीयीयाताम् अधीयीरन् etc.

15. यु मिश्रणे अमिश्रणे च अदा० प० प० यु to join or separate.
उतो वृद्धिर्लुकि हलि ॥ ७ । ३ । ८९ ॥
Fully stated, लुकि उतः अङ्गस्य हलि पिति सार्वधातुके वृद्धिः नाभ्यस्तस्य ।

When an affix has been elided (शप् in the present case), the final उ (short) of a root-base takes its वृद्धि substitute followed by a सार्वधातुक पित् affix beginning with a consonant – the rule, however, does not apply to a reduplicated base (अभ्यस्त).

Thus, यु + ति = यौति; similarly यौषि, यौमि ।
यौति युतः युवन्ति । यौषि युथः युथ । यौमि युवः युमः ।
लङ् – अयौत् अयुताम् अयुवन् etc.
लोट – यौतु युताम् युवन्तु etc.
विधि० – युयात् युयाताम् युयुः etc.

The following roots are similarly conjugated – णु स्तुतौ अदा० प० प० ष्णु प्रस्रवणे अदा० प० प०, कु शब्दे अदा० प० प०, टुक्षु शब्दे (टु इत्) अदा० प० प०, क्ष्णु तेजने अदा० प० प०§

16. तु (सौत्रः) गतिवृद्धिहिंसासु अदा० प० प० तु to go, to be strong, to injure.
रु शब्दे अदा० प० प० to make any sound.
ष्टुञ् स्तुतौ अदा० प० प० to praise.

---

* अधि + इ + अन्ति = अधि + य् + अन्ति = अधियन्ति ।
‡ अधि + इ + आते = अधि + इय् + आते = अधीयाते । Similarly अधीयते
§ समः क्ष्णुवः ॥ १ । ३ । ६५ ॥ (आत्मनेपदम्)
Preceded by सम्, क्ष्णु takes आ० प० affixes.
संक्ष्णुते शस्त्रम् – (He) sharpens the weapon.

तुरुस्तुशम्यमः सार्वधातुके ॥ ७ । ३ । ९५ ॥

Fully stated, तु-रु-स्तु-शमि-अमः तिङि हलि सार्वधातुके ईट् वा ।

The initial augment ईट्-ई (ट् इत्) is optionally added to a सार्वधातुक तिङ् affix beginning with a consonant following the roots तु, रु, स्तु, शम् and अम् This applies to all affixes, पित् or अपित्.

स्तु+ति = स्तौति वृद्धि by उतो वृद्धिः० - ॥ ७ । ३ । ८९ ॥
or स्तो+ईति = स्तवीति गुण as the affix is अजादि
स्तु+तस् = स्तुतः or स्तुवीतः । Optional ईट्.
स्तु+अन्ति = स्तुवन्ति । No ईडागम as the affix is अजादि.

लट् - प० प० स्तौति-स्तवीति स्तुतः-स्तुवीतः स्तुवन्ति etc.
आ० प० स्तुते-स्तुवीते स्तुवाते स्तुवते etc.
लङ् - प० प० अस्तौत्-अस्तवीत् अस्तुताम्-अस्तुवीताम् अस्तुवन etc.
आ० प० अस्तुत-अस्तुवीत अस्तुवाताम् अस्तुवत etc.
लोट् - प० प० स्तौतु-स्तवीतु स्तुताम्-स्तुवीताम् स्तुवन्तु etc.
आ० प० स्तुताम्-स्तुवीताम् स्तुवाताम स्तुवताम etc.
विधि० - प० प० स्तुयात्-स्तुवीयात् स्तुयाताम्-स्तुवीयाताम् स्तुयुः-स्तुवीयः
आ० प० स्तुवीत स्तुवीयाताम् स्तुवीरन् ।

तु अदा० प० प०
लट् - तौति-तवीति तुतः-तुवीतः तुवन्ति etc.
लङ् - अतौत्-अतवीत् अतुताम्-अतुवीताम् अतुवन् etc.
लोट् - तौतु-तवीतु तुताम्-तुवीताम् तुवन्तु etc.
विधि० - तुयात्-तुवीयात् तुयाताम्-तुवीयाताम् तुयुः-तुवीयुः etc.
रु अदा० प० प० is similarly conjugated.

Roots शम् and अम् belong to the दिवा० and भ्वा० classes respectively and take the affixes श्यन् and शप्. The present सूत्र applies to these roots only in Vedic literature in which विकरण affixes are frequently dropped.

17. ऊर्णुञ् आच्छादने अदा० उ० प० ऊर्णु to cover.

(i) **ऊर्णोतेर्विभाषा ॥ ७ । ३ । ९० ॥**

Fully stated, ऊर्णोतेः अङ्गस्य हलि पिति सार्वधातुके विभाषा वृद्धिः ।

This modifies the सूत्र, उतो वृद्धिः० - ॥ by making the वृद्धि substitute optional. Alternately there will be गुण by the general rule.

ऊर्णौति-ऊर्णोति । ऊर्णौषि-ऊर्णोषि । ऊर्णौमि-उर्णोमि ।

There will be गुण substitution for सार्वधातुक पित् affixes beginning with a vowel - और्णवम् (लङ् उ० पु० एक०)

(ii) गुणोऽपृक्ते ॥ ७ । ३ । ९१ ॥

Fully stated, ऊर्णोतेः अङ्गस्य अपृक्ते हलि पिति सार्वधातुके गुणः ।

The final of ऊर्णु takes its गण substitute followed by an अपृक्त affix (a single consonant which is सार्वधातक and पित्.

These are त्, प्र० पु० एक० लङ् - और्णोत् । and स्, म० पु० एक० लङ् - और्णोः ।

लट् - प० प० ऊर्णौति-ऊर्णोति ऊर्णुतः ऊर्णुवन्ति etc.

आ० प० ऊर्णुते ऊर्णुवाते ऊर्णुवते etc.

लङ् - प० प० और्णोत् और्णुताम और्णुवन् etc

आ० प० और्णुत और्णुवाताम् और्णुवत etc.

लोट् - प० प० ऊर्णौतु-ऊर्णोतु ऊर्णुताम् ऊर्णुवन्त etc

आ० प० ऊर्णुताम ऊर्णुवाताम् ऊर्णुवताम etc

विधि० - प० प० ऊर्णुयात ऊर्णुयाताम ऊर्णुयुः etc.

आ० प० ऊर्णुवीत ऊर्णुवायाताम ऊर्णुवीरन् etc.

१४. ब्रूञ् व्यक्तायां वाचि अदा० उ० प० ब्रू to speak, to tell.

(i) ब्रुव ईट् ॥ ७ । ३ । ९३ ॥

Fully stated, ब्रुवः हलि पिति सार्वधातुके ईट् ।

The initial augment ईट् is added to a सार्वधातुक पित् affix beginning with a consonant following the root ब्रू

Thus, ब्रू+ति = ब्रू+ईति = ब्रवीति ।

Similarly ब्रवीषि, ब्रवीमि, अब्रवीत्, अब्रवीः, ब्रवीतु ।

For पित् अजादि affixes there is no augment - अब्रवम, ब्रवाणि, ब्रवाव etc.

For ङित् affixes there is no augment - ब्रूतः, ब्रुवन्ति etc.

(ii) ब्रुवः पञ्चानामादित आहो ब्रुवः ।। ३ । ४ । ८४ ॥

Fully stated, ब्रुवः लटः परस्मैपदानाम् आदितः पञ्चानाम् णलादयः पञ्च वा ब्रुवः आहः ।

The first five लट् प० प० affixes are optionally replaced by णल्, अतुस् , उस्, थल् and अथुस् for the root ब्रू which again is replaced by आह्.

(iii) आहस्थः ॥ ८ । २ । ३५ ॥

The ह् of आह् is replaced by थ् followed by a झल् वर्ण.

Thus, ब्रू+तिः= आह्+णल् = आह्+अ । (ण् ल् इत्)
= आह । आहतुः । आहुः ।
ब्रू + सि= आह्+थल् = आह्+थ् । (ल् इत्)
= आथ्+थ । आहस्थः ॥ ८ । २ । ३५ ॥
= आत्थ । खरि च ॥ ८ । ४ । ५५ ॥ आहथुः

लट - प० प० ब्रवीति or आह ब्रूतः or आहतुः ब्रुवन्ति or आहुः । ब्रवीषि or आत्थ ब्रूथः or आहथुः ब्रूथ । ब्रवीमि ब्रूवः ब्रूमः ।

आ० प० ब्रूते ब्रुवाते ब्रुवते etc.

लङ् – प० प० अब्रवीत् अब्रूताम् अब्रुवन् etc.

आ० प० अब्रूत अब्रुवाताम् अब्रुवत etc.

लोट् – प० प० ब्रवीतु ब्रूताम् ब्रुवन्तु etc.

आ० प० ब्रूताम् ब्रुवाताम् ब्रुवताम् etc.

विधि० – प० प० ब्रूयात् ब्रूयाताम् ब्रूयुः etc.

आ० प० ब्रुवीत ब्रुवीयाताम् ब्रुवीरन् etc.

19. ईश ऐश्वर्ये अदा० आ० प० ईश् to rule, to possess.

ईड स्तुतौ अदा० आ० प० ईड् to praise, to implore.

(i) ईशः से ।। ७ । २ । ७७ ।।

(ii) ईडजनोर्ध्वे च ।। ७ । २ । ७८ ।।

Fully stated, ईशः ईडजनोः सार्वधातुके से ध्वे च इट् ।

The initial augment इट् is added to the सार्वधातुक affixes से and ध्वे following the roots ईश्, ईड् and जन्.*

Thus, ईशिसे, ईशिध्वे; ईडिषे, ईडिध्वे ।

This rule applies to the लोट् affixes स्व and ध्वम् as the ए of से and ध्वे have been replaced by व् and अम् respectively – सवाभ्यां वामौ ।। ३ । ४ । ९१ ।। एकदेशविकृतस्य अनन्यत्वात् – a form modified in part is the same as the original one. Thus we get ईशिष्व, ईशिध्वम्; ईडिष्व, ईडिध्वम् ।

This does not apply to the लङ् affix ध्वम् as ध्वे itself is a modification of the original तिङ् affix ध्वम् for लट् and लोट्–टित आत्मने० –।। ३ । ४ । ७९ ।। विकृतिग्रहणेन प्रकृतेः अग्रहणम् – a rule laid down for a modified form cannot apply to the original, from which it is modified.

Thus for लङ् ईश्–ऐड्ढ्वम्; ईड्–ऐड्ढ्वम् ।

ईश् – लट् ईष्टे ईशाते ईशते । ईशिषे ईशाथे ईशिध्वे etc

लङ् ऐष्ट ऐशाताम् ऐशत । ऐष्ठाः ऐशाथाम् ऐड्ढ्वम् etc.

लोट् ईष्टाम् ईशाताम् ईशताम् । ईशिष्व ईशाथाम् ईशिध्वम् etc.

विधि० ईशीत ईशीयाताम् ईशीरन् etc.

ईड् – लट् ईट्टे । ईडिषे । ईडिध्वे ।

लङ् ऐट्ट । ऐट्ठाः । ऐड्ढ्वम् ।

लोट ईट्टाम् । ईडिष्व । ईडिध्वम् ।

विधि० ईडीत etc.

---

* जन् is दिवा० and takes the वि० प्र० श्यन्. Hence the present सूत्र cannot apply. In Vedic literature वि० प्र०s are many times elided and we come across the forms जनिषे, जनिध्वे.

20. The रुदादि group.

(i) रुदादिभ्यः सार्वधातुके ॥ ७ । २ । ७६ ॥

Fully stated, रुदादिभ्य: वलादेः सार्वधातुके इट् ।

The initial augment इट् is added to a वलादि (beginning with a vowel other than य्) सार्वधातुक affix following the roots रुद् etc. – रुदिर्, ञिष्वप्, श्वस्, अन् and जक्ष्.

रुद्+ति = रुद्+इति = रोदिति ।

रुद्+तस् = रुद्+इतस् = रुदित: । etc.

But रुद्+अन्ति= रुदन्ति; रुद्+यात् = रुद्यात् ।

(ii) रुदश्च पञ्चभ्यः ॥ ७ । ३ । ९८ ॥

(iii) अड्गार्ग्यगालवयोः ॥ ७ । ३ । ९९ ॥

The initial augment ईट्–ई (ट् इत्) and according to गार्ग्य and गालव the initial augment अट्–अ (ट् इत्) is added to a पित् सार्वधातुक affix which is अपृक्त (single consonant)

लङ् प्र० पु० एक० त् – अरोदीत् or अरोदत् ।

लङ् म० पु० एक० स् – अरोदीः or अरोदः ।

रुद् लट् – रोदिति रुदित: रुदन्ति etc.
लङ् – अरोदीत् or अरोदत् अरुदिताम् अरुदन् etc.
लोट् – रोदितु रुदिताम् रुदन्तु etc.
विधि० – रुद्यात् रुद्याताम् रुद्युः etc.

स्वप् लट् – स्वपिति । लङ् – अस्वपीत् or अस्वपत् ।
लोट् – स्वपितु । विधि० – स्वप्यात् ।

श्वस् लट् – श्वसिति । लङ् – अश्वसीत् or अश्वसत्
लोट् – श्वसितु । विधि० – श्वस्यात् ।

अन् लट् – अनिति* । लङ् – आनीत् or आनत् । लोट् - अनितु । विधि० – अन्यात् ।

The root जक्ष् also belongs to the अभ्यस्त group discussed in the next section.

21. The अभ्यस्त group.

(i) जक्षित्यादयः षट् ॥ ६ । १ । ६ ॥

---

* अनितेः ॥ ८ । ४ । १९ ॥
Fully stated, उपसर्गात् अनितेः नः णः ।
The न् of the root अन् is replaced by ण् preceded by an उपसर्ग having र् — प्राणिति ।

अभ्यस्तम् – the root जक्ष् and the six following are treated as अभ्यस्त bases. These are जक्ष्, जागृ, दरिद्रा, चकास्, शास्, दीधी and वेवी *

(ii) अदभ्यस्तात् ।। ७ । १ । ४ ॥

Fully stated, अभ्यस्तात् झः अत् ।

Following an अभ्यस्त base the झ of an affix is replaced by अत्

Thus, लट् प० प० झि = अति; आ० प० झ = अते ।

लोट् प० प० झु = अतु; आ० प० झाम् = अताम् ।

लङ् प० प० झि = जुस्; (सिजभ्यस्त० – ॥ ३ । ४ १०९ ॥ Ref. Sec.)

आ० प० झ = अत ।

विधि० प० प० affix is युस् and आ० प० is ईरन्.

a. जक्ष भक्षहसनयो अदा० प० प० जक्ष् to eat to laugh.

लट् – जक्षिति (रुदादि० – ॥ ७ । २ । ७६ ॥) जक्षितः जक्षति (अदभ्यस्तात्) etc

लङ् – अजक्षीत् or अजक्षत (रुदश्च० – ॥ ७ । ३ । ९८ । अजक्षिताम् अजक्षुः etc.

लोट् – जक्षितु जक्षिताम् जक्षतु etc.

विधि० – जक्ष्यात् जक्ष्याताम् जक्ष्युः etc.

b. जागृ निद्राक्षये अदा० प० प० जागृ to awake.

लट् – जागर्ति जागृत जाग्रति etc.

लङ् – अ+जागृ+त् = अ+जागर्+त् ।

= अ+जागर् । हलङ्या० – ॥ ६ १ । ६८ ॥

= अजागः । अजागृताम् ।

अ+जागृ+जुस् = अ+जागृ+उस् ।

= अ+जागर्+उस । जुसि च ॥ ७ । ३ । ८३ ।। see below

= अजागरुः ।

जुसि च ॥ ७ । ३ । ८३ ॥

Fully stated, अङ्गस्य जुसि च गुणः ।

The final इक् (short or long) of a base takes its गुण substitute followed by जुस् (लङ्)

लङ् – अजागः अजागृताम् अजागरुः etc.

लोट् – जागर्तु जागृताम् जाग्रतु etc.

विधि० – जागृयात् जागृयाताम् जागृयुः etc.

c. दरिद्रा दुर्गतौ अदा० प० प० दरिद्रा to be in need.

लट् – दरिद्रा+ति = दरिद्राति । पित् affix.

---

* Most probably these are derived by reduplication from basic roots like घस्, गॄ, द्रा, कास्, धी or ध्यै and वी. The connection with the original roots was lost and these are treated as independent roots.

दरिद्रा+तस् = दरिद्रि+तस् । इद्दरिद्रस्य ॥ ६ । ४ । ११४ ॥ see below
= दरिद्रितः ।

इद् दरिद्रस्य ॥ ६ । ४ । ११४ ॥

Fully stated, दरिद्रस्य हलि क्ङिति सार्वधातुके इत् ।

The final of दरिद्रा is replaced by इत्-इ (त् इत्) when followed by a सार्वधातुक affix which is कित् or ङित् and begins with a consonant.

दरिद्रा + अति = दरिद्र् + अति । आ is elided - श्नाभ्यस्त॰ - ॥ ६ ४ । ११२ ॥
= दरिद्रति । etc.

लङ् - अदरिद्रात् अदरिद्रिताम् अदरिद्रुः etc.

लोट् - दरिद्रातु दरिद्रिताम् दरिद्रतु etc.

विधि॰ - दरिद्रियात् दरिद्रियाताम् दरिद्रियुः etc.

d. चकासृ दीप्तौ अदा॰ प॰ प॰ चकास् to shine.

लट् - चकास्ति चकास्तः चकासति etc.

लङ् - अचकात्-द्* अचकास्ताम् अचकासुः
अचकाः-अचकात्-द्‡ अचकास्तम् etc.

लोट् - चकास्तु चकास्ताम् चकासतु । चकाधि§ or चकाद्धि चकास्तम् etc.

विधि॰ - चकास्यात् चकास्याताम् चकास्युः etc.

e. शासु अनुशिष्टौ अदा प॰ प॰† शास् to rule.

लट् - शास्+ति = शास्ति ।

शास्+तस् = शिस्+तस् । आ is replaced by इ; See below (i)
= शिष्+तस् । स् is replaced by ष् - शासिवसि॰ - ॥ ८ । ३ । ६० ॥
= शिष्टः । ष्टुना ष्टुः ॥

(i) शास इदङ्हलोः ॥ ६ । ४ । ३४ ॥

Fully stated, शासः उपधायाः इत् (स्यात्) अङ्हलोः क्ङिति ।

The penultimate of शास् is replaced by इत्-इ (त् इत्) followed by the लुङ् affix अङ् or an affix which is कित् or ङित् beginning with a consonant.

---

* तिप्यनस्तेः ॥ ८ । २ । ७३ ॥ (Chap. VIII)

‡ सिपि धातो रुर्वा ॥ ८ । २ । ७४ ॥ (Chap. VIII)

§ हि is replaced by धि - हुझल्भ्यो॰ - ॥ ६ । ४ । १०१ ॥ स् is elided - धि च ॥ ८ । २ । २५ ॥ This is the form adopted by भाष्य. Other grammarians hold that only स् of the affix सिच् is elided before ध by धि च. According to them स् is replaced by द् by झलां जश्झशि ॥ ८ । ४ । ५३ ॥ and the form then is चकाद्धि.

† For आङः शासु इच्छायाम् see Sec. 4

लट् – शास्ति शिष्टः शासति etc.

लङ् – अशात्–द् अशिष्टाम् अशासुः । अशाः, अशात्–द् अशिष्टम् etc.

लोट् – शास्तु शिष्टाम् शासतु

शास्+हि = शाधि । See below (ii); हुझल्भ्यो० – ॥

(ii) शा हौ ॥ ६ । ४ । ३५ ॥

Fully stated, शासः हौ शा ।

शास् is replaced by शा followed by the लोट् affix हि.

शिष्टम् शिष्ट etc.

विधि० – शिष्यात् शिष्याताम् शिष्युः etc.

f. दीधीङ् दीप्तिदेवनयोः अदा० आ० प० दीधी to shine, to appear.

लट् – दीधी+ते = दीधीते ।

दीधी+आते = दीध्य्+आते । ई is replaced by य्, See below (i)

= दीध्याते । दीध्यते etc.

(i) एरनेकाचोऽसंयोगपूर्वस्य ॥ ६ । ४ । ८२ ॥

Fully stated, अनेकाचः धातोः अङ्गस्य असंयोगपूर्वस्य एः यण् अचि ।

The final इ – short or long, of a root which is not preceded by a conjunct consonant, when the root has more than one vowel (अनेकाचः), is replaced by यण् (य्, व्, र्, ल्) followed by an affix beginning with a vowel.

लङ् – अदीधीत अदीध्याताम् अदीध्यत । अदीधीथाः etc.

अ+दीधी+इ = अदीधि । ई is elided, see below (ii)

(ii) यीवर्णयोर्दीधीवेव्योः ॥ ७ । ४ । ५३ ॥

Fully stated, दीधीवेव्योः अन्त्यस्य लोपः यि–इवर्णयोः (परतः)

The final vowel of दीधी and वेवी is elided followed by य् or इ.

लोट् – दीधीताम् दीध्याताम् दीध्यताम् etc.

दीधी+ऐ = दीध्यै । See below (iii)

(iii) दीधीवेवीटाम् ॥ १ । १ । ६ ॥

Fully stated, दीधीवेवीटाम् गुणवृद्धी न ।

There can be no गुण–वृद्धि substitution for दीधी, वेवी and the augment इट् (Ref. Book IV)

विधि० – दीधीत दीधीयाताम् दीधीरन् etc.

g. वेवीङ् वेतिना तुल्ये अदा० आ० प० वेवी to go etc.

लट – वेवीते; लङ् – अवेवीत; लोट – वेवीताम्; विधि० – वेवीत ।

22. The Passive construction.

The affix यक् – य (क् इत्) is added followed by आ० प० endings for लट्, लङ्, लोट् and विधिलिङ्. With यक्, the rootbase becomes अकारान्त and the modifications given in Chap. I Sec. 9 take place.

अद भक्षणे – अद्+यक्+ते = अद्यते । लङ् – आद्यत । लोट् – अद्यताम् । विधि० – अद्येत ।

या प्रापणे – यायते । अयायत । यायताम् । यायेत ।

मा माने – 'घुमास्था० – ६ । ४ । ६६ ॥' – ईत्वम् ।

मीयते । अमीयत । मीयताम् । मीयेत ।

This rule does not apply to पा रक्षणे – पायते । अपायत । पायताम् । पायेत ।
The rule also does not apply to दाप् लवणे which is not 'घु'.

दायते । अदायत । दायताम् । दायेत ।

इण् गतौ – अकृत्सार्व० – ७ । ४ । २५ ॥ दीर्घः – ईयते । ऐयत । ईयताम् । ईयेत ।

इङ् अध्ययने – 'नित्यमधिपूर्वः' अधीयते । अध्यैयत । अधीयताम् । अधीयेत ।

ष्टुञ् स्तुतौ – 'दीर्घः' स्तूयते । अस्तूयत । स्तूयताम् । स्तूयेत ।

शीङ् स्वप्ने ।

(i) अयङ् यि क्ङिति ॥ ७ । ४ । २२ ॥
Fully stated, शीङः अङ्गस्य यि क्ङिति अयङ् ।

The final of शी is replaced by अयङ् – अय् (अङ् इत्) followed by an affix which is कित् or ङित् and which begins with य्.

शी+यक्+ते = शय्+य+ते = शय्यते । अशय्यत । शय्यताम् । शय्येत ।

वच परिभाषणे – वचिस्वपि० – ॥ ६ । १ । १५ ॥ 'संप्रसारणम्'

उच्यते । औच्यत । उच्यताम् । उच्येत ।

ञिष्वप् शये – सुप्यते । असुप्यत । सुप्यताम् । सुप्येत ।

वश कान्तौ – ग्रहिज्या० – ॥ ६ । १ । १६ ॥ संप्रसारणम् ।

उश्यते । औश्यत । उश्यताम् । उश्येत ।

अस् भुवि ।

(ii) अस्तेर्भूः ॥ २ । ४ । ५२ ॥
Fully stated, अस्तेः आर्धधातुके भूः ।

The root अस् is replaced by भू followed by an आर्धधातुक affix. यक् is आर्धधातुक.

अस+यक्+ते = भूयते । अभूयत । भूयताम् । भूयेत ।

ब्रूञ् व्यक्तायां वाचि ।

(iii) ब्रुवो वचिः ॥ २ । ४ । ५३ ॥
Fully stated, ब्रुवः आर्धधातुके वचिः ।

The root ब्रू is replaced by वच् followed by an आर्धधातुक affix.

ब्रू+यक्+ते = उच्यते (सम्प्रसारण)

औच्यत । उच्यताम् । उच्येत ।

चक्षिङ् व्यक्तायां वाचि । अयं दर्शनेऽपि ।

(iv) चक्षिङः ख्याञ् ॥ २ । ४ । ५४ ॥

Fully stated, चक्षिङः आर्धधातुके ख्याञ् ।

The root चक्ष् is replaced by ख्याञ् - ख्या (ञ् इत्) followed by an आर्धधातुक affix.

चक्ष्+यक्+ते = ख्यायते ।

अख्यायत । ख्यायताम् । ख्यायेत ।

Some grammarians hold that क्शा is the substitute - क्शायते etc.

जागृ निद्राक्षये ।

(v) जाग्रोऽविचिण्णल्ङित्सु ॥ ७ । ३ । ८५ ॥

Fully stated, जाग्र: अङ्गस्य अविचिण्णल्ङित्सु गुण: ।

The final of जागृ takes its गुण substitute followed by an affix other than वि, चिण्, णल् and a ङित् affix. *

This cancels the bar against यक् which is कित्

जागृ+यक्+ते = जागर्यते । गुण ।

अजागर्यत । जागर्यताम् । जागर्येत ।

दरिद्रा दुर्गतौ ।

(vi) दरिद्रातेरार्धधातुके विवक्षिते आलोपो वाच्य: ॥ (वा०)

The final आ of दरिद्रा is elided followed by an आर्ध० affix which is कित् or ङित्.

दरिद्रयते । अदरिद्रयत । दरिद्रयताम् । दरिद्रयेत ।

शासु अनुशिष्टौ । 'शास इदङ् - ॥ ६ । ४ । ३४ ॥' - शिष्यते । अशिष्यत । शिष्यताम् । शिष्येत ।

For आ+शास् - आशास्यते । आशास्यत । आशास्यताम् । आशास्येत ।

दीधीङ् - दीध्यते । अदीध्यत । दीध्यताम् । दीध्येत ।

वेवीङ् - वेव्यते । अवेव्यत । वेव्यताम् । वेव्येत ।

23. Roots of the अदादि class.

आस उपवेशने आ० प० आस् - to sit, to rest, to be present.

With अधि (अध्यास्) ‡ to lie down, to settle upon; with अनु (अन्वास्) - to be

---

* वि = क्विप्, क्विन् etc. चिण् is a substitute for सिच् in लुङ्; णल् is a लिट् affix.

‡ अधिशीङ्स्थासां कर्म । १ । ४ । ४६ ॥

The support for the activity indicated by verbs formed by the roots शीङ्, स्था and आस् preceded by अधि is treated as कर्म (कर्मणि द्वितीया ।)

शिव: कैलासम् अध्यास्ते - शिव dwells in कैलास.

seated near, to wait upon; with उद् – to sit away from; to be inactive or indifferent; with उप - to sit near to, to serve; with परि and उप (पर्युपास) to sit round, to attend or worship, to resort to.

इण् गतौ प० प० इ to go.

With अति (अती) – to go beyond, to excel; with अधि (अधी) – to understand; with अनु (अन्वि) – to go after, to follow, to imitate; with अप (अपे)* – to go away; with अपि (अपी) – to go near, to join; with अभि (अभी) – to approach; with अव (अवे) – to consider; with आ (ए) – to come; with उद (उदि) to rise; with अभि & उद् (अभ्युदि) – to rise; with उप (उपे) – to go near; with निस् – निर (निरि) – to depart; with परि (परी) – to surround; with प्र (प्रे) – to go out, to depart; with प्रति प्रती) – to meet, to believe etc.; with प्रति & अव (प्रत्यवे) – to come down again, to offend; with वि (वी) – to go apart, to undergo a change; with वि & अति (व्यती) – to swerve from, to elapse etc. with सम् (समि) – to come together; with सम् & अनु (समन्वि) – to go together after; with सम् & अव (समवे) – to come together, to unite; with सम् & प्रति (सम्प्रती) – to go towards, to believe firmly in;

ईर् गतौ कम्पने च आ० प० ईर् to go, to move. (Also चुरा० युजा० ईर क्षेपे)

With उद् (उदीर्) – to start off; with प्र (प्रेर्) – to move, to appear; with सम् (समीर्) – to move together. The causal form is ईरि – to cause to move (with उद, प्र & सम्).

ख्या प्रकथने प० प० ख्या – to make known, to relate.

With आ – to tell; with प्र – to announce, to extol; with प्रति & आ (प्रत्याख्या) – to deny; with वि – to celebrate, to call; with वि & आ (व्याख्या) to explain in detail; with सम् (संख्या) – to count, to enumerate.

चक्षिङ् व्यक्तायां वाचि दर्शनेऽपि आ० प० चक्ष् to speak, to tell, to see.

With अव – to look down upon, to perceive; with आ – to inspect, to relate, with प्र – to relate; with वि – to see distinctly, to proclaim; with वि & आ (व्याचक्ष्) – to relate, to explain; with सम् – to observe, to relate fully.

णु स्तुतौ प० प० नु – to praise, to commend.

With आ (आ० प०) ‡ – to sound, with प्र (प्रणु) – to praise.

दिह उपचये उ० प० दिह् – to anoint, to smear.

---

* एत्येधत्यूठसु ॥ ६ । १ । ८९ ॥ अयैति । अवैति । प्रैति etc.

‡ आङि नुप्रच्छ्योरुपसंख्यानम् ॥ (वा०) आनुते शृगालः ।

With उप – to cover; with सम् – to besmear, to be doubtful or uncertain;

ब्रूञ् व्यक्तायां वाचि उ० प० ब्रू – to speak, to tell.

With अनु – to learn by heart (by speaking after); with प्र – to speak forth, to announce, to teach; with प्रति – to answer.

या प्रापणे प० प० या – to go.

With अनु – to follow; with अप – to depart; with अभि – to approach; with अव – to go down, to understand; with आ – to come, to attain; with उद् – to rise, to go away; with उप – to go near; with निस्, निर् – to set out for, to pass away (as time); with परि to surround; with प्रति – to go against, to return; with सम् – to go together. The causal form is यापि – to cause to pass or spend (time).

रु शब्दे प० प० रु – to make sound, to cry, to hum.

With आ – to cry out; with वि – to bewail; with सम् – to cry together, to roar.

वा गतिगन्धनयो: अदा० प० प० वा – to blow, to emit an odour.

With उद् – to blow out; with निस्, निर् – to blow (as wind), to be extinguished; with प्र – to blow forth, to yield a scent. The causal form is वापि (निर्वापि – to put out, to extinguish, to refresh).

विद ज्ञाने प० प० विद् – to know, to understand.

With सम् (आ० प०)* – to know thoroughly, to recognise, to approve. The causal form is वेदि (आवेदि – to make known, निवेदि – to offer, to present, to announce)

शीङ् स्वप्ने आ० प० शी – to lie down, to sleep.

With अति – to surpass; with अधि‡ – to lie upon; with अनु – to lie close to to repent; with सम् – to become feeble, to waver.

श्वस प्राणने प० प० श्वस् – to breath.

With उद् (उच्छ्वस्) – to breath hard, to live, to bloom; with नि (निश्वस्) to draw in breath, to sigh; with निस्, निर् (नि:श्वस्) – to exhale, to breath; with वि – to draw breath freely, to confide in; with आ – to recover breath, to take heart; with सम् & आ (समाश्वस्) to take courage.

---

* विदिप्रच्छिस्वरतीनामुपसंख्यानम् ।। (वा०) आत्मनेपदम् – preceded by सम्.

‡ अधिशीङ्स्थासां कर्म ।। १ । ४ । ४६ ।।

नारायण: शेषमधिशेते – नारायण lies down upon शेष.

The causal form is श्वासि (आश्वासि – to encourage, to comfort).

ष्टुञ् स्तुतौ उ० प० स्तु to praise.

With अभि (अभिष्टु)* – to praise, to extol; with नि (निष्टु) – to praise; with परि (परिष्टु) – to praise; with प्र (प्रस्तु) – to praise aloud, to begin; with वि (विष्टु) – to praise very much; with सम् (संस्तु) – to praise in chorus, to laud.

हन हिंसागत्योः प० प० हन् – to strike, to kill, to go (rarely).

With अप – to repel, to take away; with अव – to strike, to remove; with आ‡ – to strike, to attack; with नि – to kill, to overwhelm; with परि to wind round, to extinguish; with प्र§ – to strike, to slay; with वि – to beat asunder, to destroy; with सम् – to strike together, to join, to close.

ह्रुङ् अपनयने आ० प० ह्रु – to take away, to hide.

This occurs many times with अप and नि with the same meanings.

Examples :

शिवास्ते सन्तु पन्थानः ।
निर्बुद्धिः क्षयमेति ।
वरुणोऽपामीष्टे ।†

---

* उपसर्गात् सुनोतिसुवति० – ॥ ८ । ३ । ६५ ॥ परिनिविभ्य० – ॥ ८ । ३ । ७० ॥ (7, II)
स् is replaced by ष्. With the augment अट्, this is optional if परि, नि and वि precede.

‡ आङो यमहनः ॥ १ । ३ । २८ ॥
Preceded by आङ्, हन् takes आ० प० affixes if used intransitively :
अश्वः खुरेण भूमौ आहते – the horse strikes at the ground with its hoof.
स्वाङ्गकर्मकाच्चेति वक्तव्यम् ॥ (वा०)
पाणिना मस्तकम् आहते – (He) strikes his own head with the hand.

§ हन्तेरत्पूर्वस्य ॥ ८ । ४ । २२ ॥ नस्य णत्वम् – परिहण्यते; प्रहण्यते
वमोर्वा ॥ ८ । ४ । २२ ॥ वमयोः परयोः वा – परिहन्मि/परिहण्मि; परिहन्वः/परिहण्वः; परिहन्मः/परिहण्मः । Similarly for प्र.

† अधीगर्थदयेशां कर्मणि ॥ २ । ३ । ५२ ॥
The object of the roots इक् preceded by अधि or any other root having this meaning, the roots दय् and ईश् takes षष्ठी (शेषे)
अध्येति मातुः or स्मरति मातुः – (He) remembers the mother
दरिद्राणां दयते – (He) feels compassion for the poor.
जगतः ईष्टे – (He) rules over the universe.
When however the कारक relationship is definitely emphasised it takes द्वितीया–मातरं स्मरति ।

शुको जनकाद् ब्रह्मविद्यामध्यैत ।*
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ।
चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् ।‡
वत्सेहि गृहं गच्छाव: ।§
तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं मा कुरु ।
निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मी: समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्यायात् पथ: प्रविचलन्ति पदं न धीरा: ॥

---

* आख्यातोपयोगे ॥ १ । ४ । २८ ॥

The 'instructor' is अपादान in a regular course of instruction. Being अपादान it takes the पञ्चमी. 'जनक' in this case is the instructor.

‡ निमित्तात्कर्मयोगे ॥ (वा०)

A word connected with the कर्म is placed in सप्तमी if it signifies the निमित्त or the purpose of the activity indicated by the verb.

§ ओमाङोश्च ॥ ६ । १ । ९५ ॥

अ – short or long followed by ओम् or आङ् is replaced by a single substitute, the following one.

शिवाय ओं नम: = शिवायों नम: ।

बत्स एहि = वत्सेहि । (आ+इण्)

———

CHAPTER XI

प्रातिपदिक bases ending in व, र्, स etc.

1. दिव् स्त्री०* The heaven, the sky.

दिव्+सु = दि+ओ+स् । व् is replaced by ओ – see below (i)
= द्योः इ is replaced by य् – इको यणचि ॥ ६ । १ । ७७ ॥

(i) दिव ओत् ॥ ७ १ । ८४ ॥
Fully stated. दिवः अङ्गस्य ओत् सौ ।
The final of दिव् is replaced by ओत् – ओ (त् इत्) followed by the affix सु.
दिवौ दिवः etc

दिव् + भ्याम् = दि+उ+भ्याम् । व् is replaced by उ - see below (ii)
= द्युभ्याम्

ii) दिव उत् ॥ ६ । १ । १३१ ॥
Fully stated, दिवः उत् पदान्ते ।

The final of दिव् is replaced by उत्–उ (त् इत्) when it is treated as a पद दिव् is treated as a पद before भ्याम्, भिस्, भ्यस् and सुप्.
द्यौः दिवौ दिवः । दिवम् दिवौ दिवः । दिवा द्युभ्याम् द्युभिः । दिवे द्युभ्याम् द्युभ्यः । दिवः द्युभ्याम् द्युभ्यः । दिवः दिवोः दिवाम् । दिवि दिवोः द्युषु हे द्यौः दिवौ दिवः

2. द्वार् स्त्री० A door, a gate.
द्वाः द्वारौ द्वारः । द्वारम् द्वारौ द्वारः । द्वारा द्वार्भ्याम् द्वार्भिः etc
द्वार्षु – र् remains as it is before सुप् (स० बहु०) as only रु – र (उ इत्) is replaced by विसर्ग before सुप् by रोः सुपि ॥ ८ । ३ । १६ ॥

3. गिर् स्त्री० Speech, language; धुर् स्त्री० A yoke; पुर् स्त्री० A town, a city.

These words have been formed from the roots गॄ निगरणे तुदा० प० प० or गॄ शब्दे क्र्या० प० प०, धुर्वी हिंसायाम भ्वा० प० प० and पॄ पालनपूरणयो: जुहो० or क्र्या० प० प० by the addition of क्विप् । वि). The इ of वि is only to help pronunciation, the single consonant affix व् is elided by वेरपृक्तस्य ॥ ६ । १ । ६७ ॥‡ The affix क्विप् elides but it modifies the roots to some extent – they are now treated as noun-bases

---

* In vedic this word occurs usually in the masculine gender.

‡ गॄ+क्विप् = गॄ = गिर् । ॠत इद् धातोः ॥ ७ । १ । १०० ॥
पॄ+क्विप् = पॄ = पुर् । उदोष्ठ्यपूर्वस्य ॥ ७ । १ । १०२ ॥
धुर्व्+क्विप् = धुर्व् वि = धुर् । व following र् is elided by राल्लोपः ॥

राल्लोपः ॥ ६ । ४ । २१ ॥
Fully stated, अङ्गस्य रात् च्छ्वोः क्विझलोः क्ङिति अनुनासिके च लोपः ।
च्छ and व् occurring after the र of a base are elided followed by the affix क्वि or an affix beginning with a झल् वर्ण that is कित् or ङित् or an affix beginning with a nasal.

र्वोरुपधाया दीर्घ इकः ॥ ८ । २ । ७६ ॥

Fully stated, पदस्य धातोः र्वोः उपधायाः इकः दीर्घः ।

The penultimate इ, उ, ऋ, ऌ of a base ending in र् or व् is lengthened when treated as a पद.

गिर्+सु = गिर् । स् is elided – हल्ङ्या० – ॥ ६ । १ । ६८ ॥
= गीर् । The penultimate इ is lengthened.
= गीः ।

गिर् is also treated as a पद before भ्याम्, भिस्, भ्यस् and सुप्-गीर्भ्याम्, गीर्भिः, गीर्भ्यः, गीर्षु ।

Thus गीः गिरौ गिरः । गिरम् गिरौ गिरः । गिरा गीर्भ्याम् etc.
Similarly धूः धुरौ धुरः । धुरम् धुरौ धुरः । धुरा धूर्भ्याम् etc. (धूर्षु)
पूः पुरौ पुरः । पुरम् पुरौ पुरः । पुरा पूर्भ्याम् etc. (पूर्षु)

आशिस् स्त्री० Asking for, prayer, blessing.

This word has been derived from आङः शासु इच्छायाम् अदा० आ० प० by the addition of the affix क्विप्.

आशासः क्वौ उपधाया इत्व वाच्यम् ॥ (वा०)

The penultimate of the root शास् preceded by आ is replaced by इ followed by the affix क्वि.

आ+शास्+क्विप् = आ+शिस्+वि = आशिस् । वेरपृक्त० – ॥ ६ । १ । ६७ ॥

Where स् is replaced by रु the rule र्वोरुपधाया० – ॥ applies.

आशिस्+सु = आशिस् । हल्ङ्या० – ॥ ६ । १ । ६८ ॥
= आशिर् । ससजुषो० – ॥ ८ । २ । ६६ ॥
= आशीर् । र्वोरुप० – ॥ ८ । २ । ७६ ॥
= आशीः । खरवसान० – ॥ ८ । ३ । १५ ॥

आशिस्+औ = आशिषौ । ष् by शासिवसि० – ॥ ८ । ३ । ६० ॥ (II, 16)

आशिस् is treated as a पद before भ्याम्, भिस्, भ्यस् and सुप् – आशीर्भ्याम् etc.

5. अर्चिस् स्त्री, नपुं० A ray of light, flame.
सर्पिस् नपुं० Clarified butter.
हविस् नपुं० An oblation.

These words have been formed by the addition of the उणादि affix इसि – इस् (इ इत्) to the roots अर्च्, सृप् and हु*

अर्चिस्+सु = अर्चिः । (६ । १ । ६८ ॥ ८ । २ । ६६ ॥ ८ । ३ । १५ ॥ apply)
अर्चिस्+औ = अर्चिषौ । ष् by आदेशप्रत्यय० – ॥ ८ । ३ । ५९ ॥

---

* **अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः ॥ उणादि – २७३ ॥**

अर्चिषः etc.; अर्चिर्भ्याम्; अर्चिःषु or अर्चिष्षु ।

अर्चिस् नपुं० —

अर्चिस्+सु = अर्चिः । (७ । १ । २३ ॥ ८ । २ । ६६ ॥ ८ । ३ । १५ ॥ apply)
अर्चिस्+शी = अर्चिस्+ई = अर्चिषी । ष् by आदेशप्रत्यय० – ॥ ८ । ३ । ५९ ॥
अर्चिस्+शि = अर्चिन्स्+इ । नपुंसकस्य० – ॥ ७ । १ । ७२ ॥ नुमागमः ।
= अर्चीन्स्+इ । इ is lengthened - see below (i)
= अर्चीन्ष्+इ । स is replaced by ष् - see below (ii)
= अर्चींषि । अनुस्वार by नश्चापदा० – ॥ ८ । ३ । २४ ॥ (I, 6)

(i) सान्तमहतः संयोगस्य ॥ ६ । ४ । १० ॥
Fully stated, सान्तसंयोगस्य महतःच यो नकारः तस्योपधायाः दीर्घः सर्वनामस्थाने असम्बुद्धौ ।

The penultimate of न् of a base ending in a conjunct consonant, स् being the last वर्ण and of the प्रातिपदिक base महत्*, is lengthened followed by a सर्वनामस्थान affix other than the vocative singular. 'शि' is a सर्वनामस्थान affix.

(ii) नुम्विसर्जनीयशर्व्यवायेऽपि ॥ ८ । ३ । ५८ ॥
Fully stated, नुम्–विसर्जनीय–शर्व्यवाये अपि इण्कोः सस्य मूर्धन्यः ।

स् following an इण् वर्ण or a guttural is replaced by ष् even if the augment नुम्, a विसर्जनीय or a शर् वर्ण intervenes.
प्र० and द्वि० – अर्चिः अर्चिषी अर्चींषि ।

The rest as for अर्चिस् स्त्री० – अर्चिषा, अर्चिर्भ्याम् etc.
सर्पिस् नपुं०, हविस् नपुं० are declined in the same way.

6. धनुस् पुं० नपुं० A bow; वपुस् नपुं० Body; यजुस् नपुं० A sacrificial prayer, the name of a Veda; चक्षुस् नपुं० The eye, sight.
These words have been formed by the addition of the उणा० affix उसि उस् (इ इत्)‡ to the roots धन धान्ये जुहो० प० प०; डुवप बीजसंताने भ्वा० उ० प० यज देवपूजादिषु भ्वा० उ० प० चक्षिङ् व्यक्तायां वाचि दर्शनेऽपि अदा० आ० प०
धनुस् पुं० – धनुः धनुषौ धनुषः । धनुषम् धनुषौ धनुषः । धनुषा धनुर्भ्याम् धनुर्भिः etc.
(धनुःषु or धनुष्षु)

---

* For the declension of महत् refer Chap. XIII

‡ अर्तिपृवपियजितनिधनितपिभ्यो नित् ॥ उणादि – २८२ ॥
The affix उस् is added to ऋ, पृ etc. and is treated as नित्.
चक्षेः शिच्च ॥ उणादि – २८४ ॥
It is also added to चक्षिङ् and then is treated as शित्. Being शित् it is सार्वधातुक and चक्षिङ् will not be replaced by ख्याञ्.

नपुं० - धनु: धनुषी धनूंषि etc. The rest as in masculine.
वपुस् नपुं०, यजुस् नपुं० and चक्षुस् नपुं० are declined like धनुस् नपुं०

7. सजुष् पुं०, स्त्री०, नपुं० An associate, a companion.

This word has been formed by the addition of the affix क्विप् to the root जुषी प्रीतिसेवनयोः तुदा० आ० प० preceded by सह – shortened to स.

सह जुषते इति सह+जुष+क्विप् = सजुष्।

The final ष् of सजुष्, occurring as a पद, is replaced by रु – ससजुषो रुः ॥ ८ । २ । ६६ ॥ सजुष् being a noun-base, the rule र्वोरुप० – ॥ ८ । २ । ७६ ॥ applies.

पुं० स्त्री० – सजू: सजुषौ सजुष:। सजुषम् सजुषौ सजुष:। सजुषा सजूर्भ्याम् सजूर्भि: etc.
(सजूःषु or सजूष्षु)

नपुं० – प्र० द्वि० – सजू: सजुषी सजूंषि। सजुषा, सजूर्भ्याम् etc.

8. भास् स्त्री० Light, lustre.

भास् + सु = भास् = भार् = भा:। (६ । १ । ६८ ॥ ८ । २ । ६६ ॥ ८ । ३ । १५ ॥)
भासौ भास:। भासम् भासौ भास:। भासा,
भास् + भ्याम् = भार्+भ्याम्। ससजुषो० – ॥ ८ । २ । ६६ ॥
= भाय्+भ्याम्। य् by भोभगो० – ॥ ८ । ३ । १७ ॥ (I, 19)
= भाभ्याम्। य् is elided by हलि सर्वेषाम् ॥ ८ । ३ । २२ ॥ (I, 19)

भाभि:, भासे etc.
भास् + सुप् = भार्+सु। ८ । २ । ६६ ॥
= भाः+सु। रोः सुपि ॥ ८ । ३ । १६ ॥
or भास्सु। विसर्जनीयस्य सः ॥ ८ । ३ । ३४ ॥

9. चन्द्रमस् पुं० The moon; उषस् स्त्री० The dawn; मनस् नपुं० The mind.

चन्द्रमस्+सु = चन्द्रमास् + सु। The penultimate अ is lengthened by
= चन्द्रमा:। अत्वसन्तस्य० – ॥ See below.

अत्वसन्तस्य चाधातोः ॥ ६ । ४ । १४ ॥
Fully stated, अधातोः अत्वसन्तस्य अङ्गस्य उपधायाः दीर्घः असम्बुद्धौ सौ परे।

The penultimate of a base ending in अतु and अस्, other than a धातु, is lengthened followed by सु (not of vocative).

चन्द्रमसौ चन्द्रमस:। चन्द्रमसम् चन्द्रमसौ चन्द्रमस:। चन्द्रमसा,
चन्द्रमस्+भ्याम् = चन्द्रमर्+भ्याम्। (८ । २ । ६६)
= चन्द्रम+उ+भ्याम्। हशि च ॥ ६ । १ । ११४ ॥ (I, 19)
= चन्द्रमोभ्याम्। अ + उ = ओ। आद्गुणः ॥ ६ । १ । ८७ ॥ (I, 7)

चन्द्रमोभिः चन्द्रमोभ्यः etc. चन्द्रमःसु or चन्द्रमस्सु ।

हे चन्द्रमः – No lengthening for सम्बुद्धि.

उशस् स्त्री० उषाः उषसौ उषसः etc.

मनस् नपुं० मनः मनसी मनांसि (अ is lengthened by सान्तमहतः० – ॥)

The rest like चन्द्रमस्.

10. उशनस् पुं० The name of an ancient sage.

पुरुदंसस् पुं० A name of Indra.

अनेहस् पुं० One without a rival, time.

ऋदुशनस्पुरुदंसोऽनेहसां च ॥ ७ । १ । ९४ ॥ (II, 14)

The final of a stem ending in ऋ, उशनस्, पुरुदंसस् and अनेहस् is replaced by अनङ् – अन् (अ ङ् इत्) followed by the affix सु (not the vocative singular).

उशनस्+सु = उशन+अन्+स् ।	स् is replaced by अन्
= उशनन्+स् ।	अ+अ = अ – अतो गुणे ॥ ६ । १ । ९७ ॥
= उशनान्+स् ।	अ is lengthened by सर्वनामस्थाने० – ॥ ६ । ४ । ८ ॥
= उशनान् ।	स् is elided by हलङ्ग्या० – ॥ ६ । १ । ६८ ॥
= उशना ।	नलोपः० – ॥ ८ । २ । ७ ॥

उशनसौ उशनसः । उशनसम् उशनसौ उशनसः । उशनसा उशनोभ्याम् etc. हे उशनन्, उशन or उशनः ।

अस्य सम्बुद्धौ वाऽनङ् नलोपश्च वा वाच्यः ॥ (वा०)

The final of उशनस् is optionally replaced by अनङ् before the voc. singular and then न् is elided optionally.

Similarly पुरुदंसा पुरुदंसौ etc. (But only हे पुरुदंसः)

अनेहा अनेहसौ etc. (हे अनेहः)

11. Some irregular bases.

a. प्रशाम् पुं० स्त्री० नपुं० Calm, composed.

This word is formed by the addition of क्विप् to the root शमु उपशमे दिवा० प० प० preceded by प्र*

---

* प्रशाम्यतीति प्र + शम् + क्विप् = प्रशाम् । The penultimate अ is lengthened.

अनुनासिकस्य क्विझलोः क्ङिति ॥ ६ । ४ । १५ ॥

Fully stated, अनुनासिकस्य अङ्गस्य उपधायाः दीर्घः क्विझलोः क्ङिति ।

The penultimate of a base ending in a nasal is lengthened before क्वि or an affix beginning with a झल् वर्ण which is moreover कित् or ङित्.

प्रशाम्+सु = प्रशाम् = प्रशान् । See below (i)

(i) मो नो धातोः ॥ ८ । २ । ६४ ॥

Fully stated, धातोः मः नः पदान्ते ।

The final म् of a root is replaced by न् when it is a पद.

प्रशामौ प्रशामः, प्रशामम् प्रशामौ प्रशामः, प्रशामा प्रशान्भ्याम् etc.

प्रशाम्+सुप् = प्रशान्+सु = प्रशान्सु

or प्रशान्+ध्+सु = प्रशान्त्सु । See below (ii)

(ii) नश्च ॥ ८ । ३ । ३० ॥

Fully stated, नकारान्तात् सस्य धुट् वा ।

The initial augment धुट् is added to स् optionally coming after a नकारान्त पद.

हे प्रशान् ।

b. जरा स्त्री॰ Old age.

जराया जरसन्यतरस्याम् ॥ ७ । २ । १०१ ॥

Fully stated, जरायाः जरस् अन्यतरस्याम् अजादौ विभक्तौ ।

जरा is optionally substituted by जरस् before an अजादि affix.

Thus जरा जरे-जरसौ जराः-जरसः etc.

जराभ्याम्, जराभिः, जराभ्यः, जरासु ।

For षष्ठी बहु॰ जराणाम् or जरसाम् ।

For जरा स्त्री॰ refer Book II Chapter 8.

c. पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु ॥ ६ । १ । ६३ ॥

पद्-दत्-नस्-मास्-हृद्-निश्-असन्-यूषन्-दोषन्-यकन्-शकन्-उदन्-आसन् अन्यतरस्यां शस्प्रभृतिषु ।

Words पद्, दत्, नस्, मास्, हृद्, निश्, असन्, यूषन्, दोषन्, यकन्, शकन्, उदन् and आसन् optionally replace पाद, दन्त, नासिका, मास, हृदय, निशा, असृज्, यूष, दोस्, यकृत्, शकृत्, उदक, and आस्य respectively before affixes beginning with शस्.

पाद पुं॰ The foot, leg.

पादः पादौ पादाः । पादम् पादौ पादान् or पदः । पादेन or पदा पादाभ्याम् or पद्भ्याम् etc.

दन्त पुं॰ A tooth, a tusk.

दन्तः दन्तौ दन्ताः । दन्तम् दन्तौ दन्तान्—दतः । दन्तेन-दता दन्ताभ्याम्-दद्भ्याम् etc.

नासिका स्त्री॰ The nose.

नासिका नासिके नासिकाः । नासिकाम् नासिके नासिकाः-नसः । नासिकया-नसा नासिकाभ्याम्-नोभ्याम् etc.

मास पु० नपुं० A month.

मासः मासौ मासाः । मासम् मासौ मासान्-मासः । मासेन-मासा मासाभ्याम्-माभ्याम् etc.

नपुं० – मासम् मासे मासानि । मासम् मासे मासानि-मांसि etc.

हृदय नपुं० The heart.

हृदयम् हृदये हृदयानि । हृदयम् हृदये हृदयानि-हृंदि । हृदयेन-हृदा हृदयाभ्याम्-हृद्भ्याम् etc.

निशा स्त्री० Night.

निशा निशे निशाः । निशाम् निशे निशाः-निशः । निशया-निशा निशाभ्याम्-निड्भ्याम् etc.

असृज् नपुं० Blood.

असृक्-ग् असृजी असृञ्जि । असृक्-ग् असृजी असृञ्जि-असानि । असृजा-अस्ना असृग्भ्याम्-असभ्याम् etc.

यूष पुं० नपुं० Soup, broth.

यूषः यूषौ यूषाः । यूषम् यूषौ यूषान्-यूष्णः । यूषेण-यूष्णा यूषाभ्याम्-यूषभ्याम् etc.

यूषम् यूषे यूषाणि । यूषम् यूषे यूषाणि-यूषाणि । यूषेण-यूष्णा यूषाभ्याम्-यूषभ्याम् etc.

दोस् पुं० नपुं० The fore-arm or arm.

दोः दोषौ दोषः । दोषम् दोषौ दोषः-दोष्णः । दोषा-दोष्णा दोर्भ्याम्-दोषभ्याम् ।

दोः दोषी दोंषी । दोः दोषि दोंषि-दोषाणि । दोषा-दोष्णा दोर्भ्याम्-दोषभ्याम् etc.

यकृत् नपुं० The liver.

यकृत्-द् यकृती यकृन्ति । यकृत्-द् यकृती यकृन्ति-यकानि । यकृता-यक्ना यकृद्भ्याम्-यकभ्याम् etc.

शकृत् नपुं० Ordure, excrement – like यकृत्.

उदक नपुं० Water.

उदकम उदके उदकानि । उदकम् उदके उदकानि-उदानि । उदकेन-उद्ना उदकाभ्याम्-उदभ्याम् etc.

आस्य नपुं० The mouth.

आस्यम् आस्ये आस्यानि । आस्यम् आस्ये आस्यानि-आसानि । आस्येन-आस्ना आस्याभ्याम्-आसभ्याम् etc.

d. मांसपृतनासानूनां मांस्पृत्स्नवो वाच्याः शसादौ वा ॥ (वा०)

Words मांस्, पृत् and स्नु optionally replace मांस, पृतना and सानु respectively before affixes from शस् onwards.

मांस नपुं० – मांसम् मांसे मांसानि । मांसम् मांसे मांसानि-मांसि । मांसेन-मांसा मांसाभ्याम्-मान्भ्याम्* etc.

---

* मांस्+भ्याम् = मान्स्+भ्याम् । अनुस्वार replaced by the original न्.
= मान्+भ्याम् । स् elided by संयोगान्तस्य लोपः ॥ ८ । २ । २३ ॥
= मान्भ्याम् ।

न् is not elided as the लोप of स् by संयोगान्तस्य लोपः is treated as असिद्ध for the application of the सूत्र नलोपः प्रातिपदिकान्तस्य ॥ ८ । २ । ७ ॥

पृतना स्त्री० – पृतना पृतने पृतनाः । पृतनाम् पृतने पृतनाः–पृतः । पृतनया–पृता पृतनाभ्याम्–पृद्भ्याम् etc.

सानु पु० – सानुः सानू सानवः । सानुम् सानू सानून्–स्नून् । स्नानुना–स्नुना सानुभ्याम्–स्नुभ्याम् etc.

नपुं० – सानु सानुनी सानूनि । सानु सानुनी सानूनि–स्नूनि etc.

e. व्याघ्रपाद् पु० स्त्री० tiger-footed.

व्याघ्रपाद्+सु = व्याघ्रपाद् । or व्याघ्रपात् । वाऽवसाने ॥

व्याघ्रपादौ व्याघ्रपादः । व्याघ्रपादम् व्याघ्रपादौ,

व्याघ्रपाद्+शस् = व्याघ्रपद्+अस् । See below पादःपत् ॥

= व्याघ्रपदः ।

पादः पत् ॥ ६ । ४ । १३० ॥

Fully stated, पादः अङ्गस्य भस्य पत् ।

पाद् of a base, when it is भ, is replaced by पद्.

A base is 'भ' before an affix beginning with य् or a vowel, other than सर्वनामस्थान.

व्याघ्रपदा व्याघ्रपाद्भ्याम् व्याघ्रपाद्भिः etc. हे व्याघ्रपात्–द् ।

Similarly सुपाद्, द्विपाद्, चतुष्पाद् etc.

In the feminine all these become optionally व्याघ्रपदी, सुपदी etc.

Then they are declined like a नदी base.

पादोऽन्यतरस्याम् ॥ ४ । १ । २ ॥

Fully stated, पादः प्रातिपदिकात् स्त्रियां ङीप् अन्यतरस्याम् ।

The affix ङीप् is added optionally in the feminine to a प्रातिपदिक base ending in पाद्.

पाद् is replaced by पद् before ङीप् by पादः पत् ॥ ६ । ४ । १३० ॥

Examples :

सत्यं हि परमं तपः ।
न ज्ञानात् परमं चक्षुः ।
क्षत्रियाणां बलं तेजो ब्राह्मणानां क्षमा बलम् ।
एकश्चंद्रस्तमो हन्ति न च तारागणोऽपि च ।
वचस्तत्र प्रयोक्तव्यं यत्रोक्तं लभते फलम् ।
किं तव मनसि वर्तते तन्मां ब्रूहि ।
दधि सर्पिः पयश्च शीघ्रमाहरातिथये चार्घ्यमर्पय ।
यस्य भासा विश्वमिदं विभाति तं पूषणं वयं गृणीमः ।
विपदि धैर्यमथाभ्युदये क्षमा सदसि वाग्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम् ॥

CHAPTER XII

Roots of the जुहोत्यादि class.

(लट्-लङ्-लोट्-विधिलिङ्)

1. Roots of the तृतीय गण are known as जुहोत्यादि after the root हु दानादनयोः which leads the class in the धातुपाठ.

जुहोत्यादिभ्यः श्लुः ॥ २ । ४ । ७५ ॥

Fully stated, जुहोत्यादिभ्यः शपः श्लुः ।

श्लु replaces the affix शप् after the roots हु etc. श्लु technically stands for elision. Thus शप् coming after the roots हु etc. is elided.*

श्लौ ॥ ६ । १ । १० ॥

Fully stated, अनभ्यासस्य धातोः प्रथमस्य एकाचः द्वे श्लौ (परतः) ।

The first syllable of an unreduplicated root is doubled followed by श्लु.‡

2. Conjugation.

a. हु दानादनयोः जुहो० प० प० to offer (as an oblation), to eat.

हु+श्लु+तिप् = हु हु+ति । अभ्यास ।
= झुहु +ति । ह् replaced by झ्, see below (i)
= जुहु +ति । झ् replaced by ज्, see below (ii)
= जुहोति । गुण – सार्वधातुकार्ध० — ॥ ७ । ३ । ८४ ॥

(i) कुहोश्चुः ॥ ७ । ४ । ६२ ॥

Fully stated, अभ्यासस्य कुहोः चुः ।

A guttural (क वर्ग) and ह् in the first syllable of a reduplicate (अभ्यास)§ are replaced by a corresponding palatal (च वर्ग). ह् is replaced by the aspirate झ्.

---

* प्रत्ययस्य लुक्श्लुलुपः ॥ १ । १ । ६१ ॥
Affixes may be elided by लुक्, श्लु or लुप् and they are then ascribed these designations respectively.

‡ Thus श्लु which stands for elision, causes reduplication in the root – लुकि प्रकृते श्लुविधानं द्विर्वचनार्थम् (काशिका) ।

§ पूर्वोऽभ्यासः ॥ ६ । १ । ४ ॥
When reduplication takes place the first of the two is known as अभ्यास.

उभे अभ्यस्तम् ॥ ६ । १ । ५ ॥
The two together are known as अभ्यस्त.
Thus in 'हुहु' the first हु is अभ्यास and हुहु is अभ्यस्त.

(ii) अभ्यासे चर्च ॥ ८ । ४ । ५४ ॥

Fully stated, अभ्यासे झलां जशः चर् च ।
A झल् वर्ण in the अभ्यास is replaced by a corresponding जश् or चर् वर्ण. In practice this means the fourth member of a वर्ग is replaced by the corresponding third member; the second member by the corresponding first member; श् ष स् remain as they are.

हु+श्लु+तस् = जुहुतः ।
हु+श्लु+झि = जुहु+अति । झ् is replaced by अत् – अदभ्य० – ॥ ७ । १ । ४ ॥
(Chap. X Sec. 21)
= जुह्वति । उ is replaced by व् – हुश्नुवोः० – ॥ ६ । ४ । ८७ ॥*
(Chap. II)

लट् – जुहोति जुहुतः जुह्वति । जुहोषि जुहुथः जुहुथ । जुहोमि जुहुवः जुहुमः ।
लङ् – अजुहोत् अजुहुताम् अजुहवुः‡ । अजुहोः अजुहुतम् अजुहुत । अजुहवम् अजुहुव अजुहुम ।
लोट् – जुहोतु जुहुताम् जुह्वतु † । जुहुधि § जुहुतम् जुहुत । जुहवानि जुहवाव जुहवाम ।
विधि० – जुहुयात् जुहुयाताम् जुहुयुः । जुहुयाः जुहुयातम् जुहुयात । जुहुयाम् जुहुयाव जुहुयाम ।

b. डुदाञ् दाने जुहो० उ० प० दा to give.

दा+श्लु+ति = दादा+ति ।
= ददा+ति । See below – ह्रस्वः ॥
= ददाति ।

ह्रस्वः ॥ ७ । ४ । ५९ ॥
अभ्यासस्य ह्रस्वः – the first syllable of a reduplicated base is shortened.

दा+श्लु+तस् = ददा+तस् ।
= दद्+तस् । श्नाभ्यस्तयोरातः ॥ ६ । ४ । ११२ ॥ **
= दत्तः ।
दा+श्लु+अति = ददति । (७ । १ । ४ ॥ ६ । ४ । ११२ ॥)

---

* The final उ in हु is replaced by व् followed by a सार्वधातुक affix beginning with a vowel.

‡ सिजभ्यस्तविदिभ्यश्च ॥ ३ । ४ । १०९ ॥ (झेः जुस्)
The affix झि (प्र० पु० बहु० of a ङित् लकार) is replaced by जुस् for an अभ्यस्त base. "जुसि च" इति गुणः । (Ref. Chap.X, Sec. 10) ।

† अदभ्यस्तात ॥ ७ । १ । ४ ॥

§ हुझल्भ्यो हेर्धिः ॥ ६ । ४ । १०१ ॥ (Ref. Chap. VIII)

** The final आ of an अभ्यस्त base is elided followed by a सार्वधातुक affix which is कित् or ङित्

लट् – प० प० ददाति दत्तः ददति । ददासि दत्थः दत्थ । ददामि दद्वः दद्मः ।

आ० प० दत्ते ददाते ददते । दत्से ददाथे दद्ध्वे । ददे दद्वहे दद्महे ।

लङ् – प० प० अददात् अदत्ताम् अददुः । अददाः अदत्तम् अदत्त । अददाम् अदद्व अदद्म ।

आ० प० अदत्त अददाताम् अददत । अदत्थाः अददाथाम् अदद्ध्वम् । अददि अदद्वहि अदद्महि ।

लोट् – प० प० ददातु दत्ताम् ददतु । देहि* दत्तम् दत्त । ददानि ददाव ददाम ।

आ० प० दत्ताम् ददाताम् ददताम् । दत्स्व ददाथाम् दद्ध्वम् । ददै ददावहै ददामहै ।

विधि० – प० प० दद्यात् दद्याताम् दद्युः । दद्याः दद्यातम् दद्यात । दद्याम् दद्याव दद्याम ।

आ० प० ददीत ददीयाताम् ददीरन् । ददीथाः ददीयाथाम् ददीध्वम् । ददीय ददीवहि ददीमहि ।

c. डुधाञ् धारणपोषणयोः जुहो० उ० प० धा to hold, to support

धा+श्लु+तिप् = धाधा+ति ।
= धधा+ति । ह्रस्वः ॥ ७ । ४ । ५९ ॥
= दधाति । अभ्यासे चर्च ॥ ८ । ४ । ५४ ॥

धा+श्लु+तस् = दधा+तस् ।
= दध्+तस् । श्नाभ्यस्त० – ॥ ६ । ४ । ११२ ॥
= धध्+तस् । द् is replaced by ध् – see below दधस्त० – ॥
= धत्तः । खरि च ॥ ८ । ४ । ५५ ॥

दधस्तथोश्च ॥ ८ । २ । ३८ ॥

Fully stated, झषन्तस्य दधः बशः भष् स्ध्वोः तथोश्च (परतः) ।

The third member द् (बश्) in the base दध् which ends in the fourth member ध् (झश्) is replaced by ध् (the corresponding fourth member) followed by affixes beginning with स्, ध्व्, त् and थ्. Similarly धत्से, धद्ध्वे, धत्थः, धत्थ etc.

लट् प० प० दधाति धत्तः दधति etc.

आ० प० धत्ते दधाते दधते etc. (धत्से, धद्ध्वे)

लङ् प० प० अदधात् अधत्ताम् अदधुः etc. उस्यप० – ॥ ६ । १ । ९६ (Chap. I)

आ० प० अधत्त अदधाताम् अदधत etc. (अधत्थाः, अधद्ध्वम्)

लोट् प० प० दधातु धत्ताम् दधतु etc. (धेहि)

आ० प० धत्ताम् दधाताम् दधताम् etc. (धत्स्व, धद्ध्वम्)

विधि० प० प० दध्यात् दध्याताम् दध्युः etc.

आ० प० दधीत दधीयाताम् दधीरन् etc.

---

* आ is replaced by ए and the अभ्यास 'द' is elided- घ्वसोरे० – ॥ ६ । ४ । ११९ ॥ (Chap. X Sec. B)

d. ह्री लज्जायाम् जुहो॰ प॰ प॰ ह्री to feel shy.

ह्री+श्लु+तिप् = ह्रीह्री+ति ।
= हीह्री+ति । See below – हलादि: शेष: ॥
= हिह्री+ति । ह्रस्व: ॥ ७ । ४ । ५९ ॥
= जिह्री+ति । कुहोश्चु: । अभ्यासे चर्च ॥
= जिह्रेति । गुण – सार्वधा॰ – ॥

हलादि: शेष: ॥ ७ । ४ । ६० ॥

Fully stated, अभ्यासस्य आदि: हल् शेष: ।

The first consonant in the अभ्यास is retained, the others are elided.

ह्री+श्लु+तस् = जिह्रीत: ।
ह्री+श्लु+ अति = जिह्रियति । इय् by अचिश्नु॰ – ॥ ६ । ४ । ७७ ॥

लट् – जिह्रेति जिह्रीतः जिह्रियति etc.
लङ – अजिह्रेत् अजिह्रीताम् अजिह्रयु: etc.
लोट् – जिह्रेतु जिह्रीताम् जिह्रियतु etc.
विधि॰ – जिह्रीयात् जिह्रीयाताम् जिह्रीयु: etc.

e. ञिभी भये जुहो प॰ प॰ भी to fear.

भी+श्लु+तिप् = भीभी+ति ।
= भिभी+ति । ह्रस्व: ॥
= बिभी+ति । अभ्यासे॰ – ॥
= बिभेति ।
भी+श्लु+तस् = बिभी+तस् ।
= बिभीत: or बिभित: । ई optionally replaced by इ – see below.

भियोऽन्यतरस्याम् ॥ ६ । ४ । ११५ ॥

Fully stated, भिय: अङ्गस्य हलि क्ङिति सार्वधातुके इत् अन्यतरस्याम् ।

The final vowel of भी is optionally replaced by इ followed by a कित् or ङित् सार्वधातुक affix beginning with a consonant.

भी+श्लु+अति = बिभी + अति = बिभ्यति । ई is replaced by य् – एरनेका॰ – ॥ ६ । ४ । ८२ ॥ (Chap X Sec. 21)

लट् – बिभेति बिभीत:-बिभित: बिभ्यति । बिभेषि बिभीथ:-बिभिथ: बिभीथ-बिभिथ ।
बिभेमि बिभीव:-बिभिव: बिभीम:-बिभिम: ।
लङ् – अबिभेत् अबिभीताम्-अबिभिताम् अबिभयु: etc.
लोट् – बिभेतु बिभीताम् – बिभिताम् बिभ्यतु etc.
विधि॰ – बिभीयात्-बिभियात् बिभीयाताम्-बिभियाताम् बिभीयु:- बिभियु: etc.

डुभृञ् धारणपोषणयोः जुहो उ० प० भृ to bear, to support.

माङ् माने शब्दे च जुहो० आ० प० मा to measure, to sound etc.

ओहाङ् गतौ जुहो० आ० प० हा to go.

भृ+श्लु+तिप् = भृभृ+ति ।

= भिभृ+ति । ऋ is replaced by इ – see below भृञामित् ॥

= बिभृ+ति । अभ्यासे चर्च ॥

= बिभर्ति । गुण – सार्वधातुका० – ॥

भृञामित् ॥ ७ । ४ । ७६ ॥

Fully stated, भृञां त्रयाणाम् अभ्यासस्य इत् श्लौ ।

The vowel in the अभ्यास of the three roots भृ, मा and ओहाङ् is replaced by इ followed by श्लु.

लट् – प० प० बिभर्ति बिभृतः बिभ्रति etc., आ० प० बिभृते बिभ्राते बिभ्रते etc.

लङ् – प० प० अबिभः अबिभृताम् अबिभरुः etc., आ० प० अबिभृत अबिभ्राताम् अबिभ्रत etc.

लोट्– प० प० बिभर्तु बिभृताम् बिभ्रतु etc., आ० प० बिभृताम् बिभ्राताम् बिभ्रताम् etc.

विधि० – प० प० बिभृयात् बिभृयाताम् बिभृयुः etc., आ०प० बिभ्रीत बिभ्रीयाताम् बिभ्रीरन् etc.

माङ् माने शब्दे च जुहो० आ० प०

मा+श्लु+ते = मामा+ते ।

= मिमा+ते । भृञामित् ॥

= मिमीते । आ is replaced by ई – ई हल्यघोः ॥ ६ । ४ । ११३ *

(Chap. VI)

लट् – मिमीते मिमाते मिमते etc.

लङ् – अमिमीत अमिमाताम् अमिमत etc.

लोट्– मिमीताम् मिमाताम् मिमताम् etc.

विधि०– मिमीत मिमीयातम् मिमीरन् etc.

ओहाङ् गतौ

लट् – जिहाते । लङ् – अजिहीत । लोट् – जिहीताम् । विधि० – जिहीत ।

g. ओहाक् त्यागे जुहो० प० प० हा to leave.

The rule भृञामित् ॥ applies only to ओहाङ्.

हा+श्लु+तिप् = जहा+ति = जहाति ।

जहा+तस् = जहीतः । आ is replaced by ई – ई हल्यघोः ॥ ६ । ४ । ११३ ॥

or जहितः । see below – जहातेश्च ॥

---

* The आ of श्ना and of an अभ्यस्त base is replaced by ई followed by a हलादि कित् or ङित् सार्व० affix-this does not apply to the घु roots दा and धा.

(i) **जहातेश्च** ॥ ६ । ४ । ११६ ॥

Fully stated, जहाते: च अङ्गस्य हलि क्ङिति सार्वधातुके अन्यतरस्याम् इत् ।

The final vowel of the root-base जहा is optionally replaced by a short इ followed by a कित् or ङित् सार्व० affix beginning with a consonant.

जहा + अति = जहति । श्नाभ्यस्तयो० – ॥ ६ । ४ । ११४ ॥

लट् – जहाति जहीत:-जहित: जहति etc.

लङ् – अजहात् अजहीताम्-अजहिताम् अजहु: etc. (उस्यप० – ॥ ६ । १ । ९६ ।)

लोट्– जहातु जहीताम्-जहिताम् जहतु

जहा+हि = जहाहि । See below आ च हौ ॥

or जहीहि – जहिहि

(ii) **आ च हौ** ॥ ६ । ४ । ११७ ॥

Fully stated, जहाते: अङ्गस्य आ च इत् अन्यतरस्यां हौ ।

The final vowel of हा is optionally replaced by इ before हि. Alternately ई by ई हल्यघो: ॥

विधिलिङ् – जह्यात् जह्याताम् जह्यु: etc.

लोपो यि ।। ६ । ४ । ११८ ।।

Fully stated, जहाते: अङ्गस्य यि क्ङिति सार्वधातुके लोप: ।

The final vowel of जहा is elided followed by a कित् or ङित् सार्वधातुक affiix beginning with य्.

Thus जहा+यात् = जह्यात् ।

h. ऋ गतौ जुहो० प० प० to go.

पॄ पालनपुरणयो: जुहो० प० प० to nourish, to fill.

लट् – ऋ+श्लु+तिप् = ऋऋ+ति ।

= इऋ+ति । See below (i)

= इय्ऋ+ति । See below (ii)

= इयृ+ति ।

= इयर्ति । गुण ।

(i) **अर्तिपिपर्त्योश्च** ।। ७ । ४ । ७७ ।।

Fully stated, अर्तिपिपर्त्योश्च अभ्यासस्य इत् श्लौ ।

The vowel in the अभ्यास of ऋ and पॄ is replaced by इ followed by श्लु.

(ii) **अभ्यासस्यासवर्णे** ॥ ६ । ४ । ७८ ॥

Fully stated, अभ्यासस्य य्वो: असवर्णे अचि इयङ्-उवङौ ।

इ and उ of an अभ्यास is replaced by इयङ् and उवङ् followed by a vowel which is असवर्ण – not homogeneous.

इयृत: । इय्रति (ऋ is replaced by र् – इको यणचि)

लङ् – आ+इयृ+त = आ+इयर्+त ।

= ऐयर्+त । आ+इ = ऐ – आटश्च ॥ ६ । १ । ९० ॥

= ऐय: । त् is elided – हलङ्या० – ॥ ६ । १ । ६८ ॥

ऐय: ऐयृताम् ऐयरु: (गुण – जुसि च ॥ ७ । ३ । ८३ ।)

लोट् – इयर्तु इयृताम इय्रतु etc.

विधि० – इयृताम् इयृयाताम् इयृयु: etc.

पॄ पालनपूरणयो: जुहो० प० प०

पॄ पॄ + ति = पिपॄ + ति = पिपर्ति । अभ्यासस्य इत् ।

पिपॄ + तस् = पिपुर् + तस् । उदोष्ठयपूर्वस्य ॥ ७ । १ । १०२ ॥ (Chap. VI)

= पिपूर्त: । उ is lengthened – हलि च ॥ ८ । २ । ७७ ॥

(I, 12)

लट् – पिपर्ति पिपूर्त: पिपुरति etc.

लङ् – अपिप: अपिपूर्ताम् अपिपरु: etc.

लोट् – पिपर्तु पिपूर्ताम् पिपुरतु etc.

विधि० – पिपूर्यात् पिपूर्याताम् पिपूर्यु: etc.

(i) णिजिर् शौचपोषणयो: जुहो० उ० प० निज् to wash or nourish.

विचिर् पृथग्भावे जुहो० उ० प० विच् to separate.

विष्लृ व्याप्तौ जुहो० उ० प० विष् to pervade.

निजां त्रयाणाम् गुण: श्लौ ॥ ७ । ३ । ८७ ॥

Fully stated, निजां त्रयाणाम् अभ्यासस्य गुण: श्लौ ।

गुण takes place in the first syllable of the reduplicated forms of the three roots निज्, विच् and विष् followed by श्लु.

निज्+श्लु+तिप् = निज् निज् + ति । Being monosyllabic the whole is repeated.

= नि निज् + ति । हलादि: शेष: ॥ ७ । ४ । ६० ॥

= ने निज + ति । निजां त्रयाणाम्० – ॥

= नेनेक्ति । गुण – सार्वधातुक० – ॥

लट् – प० प० नेनेक्ति नेनिक्त: नेनिजति etc.

आ. प० नेनिक्ते नेनिजाते नेनिजते etc.

लङ् – प० प० अनेनेक्-ग् अनेनिक्ताम् अनेनिजु: । अनेने: अनेनिक्तम् अनेनिक्त ।

अनेनिज् + अम् = अनेनिजम् । No गुण – see below नाभ्यस्त० – ॥

नाभ्यस्तस्याचि पिति सार्वधातुके ॥ ७ । ३ । ८७ ॥

Fully stated, अभ्यस्तस्य अङ्गस्य लघूपधस्य अचि पिति सार्वधातुके न गुणः ।

The penultimate short of a reduplicated base does not take its गुण substitute followed by a पित् सार्व॰ affix beginning with a vowel. Similarly for लोट् उ॰ पु॰ – नेनिजानि, नेनिजाव, नेनिजाम; नेनिजै, नेनिजावहै, नेनिजामहै।
लोट् – प॰ प॰ नेनेक्तु नेनिक्ताम् नेनिजतु etc.; आ॰ प॰ नेनिक्ताम् नेनिजाताम् नेनिजताम् etc.
विधि॰– प॰ प॰ नेनिज्यात् नेनिज्याताम् नेनिज्युः etc. आ॰ प॰ नेनिजीत नेनिजीयाताम् नेनिजारन् etc.

विज् लट् प॰ प॰ वेवेक्ति । आ॰ प॰ वेविक्ते ।
लङ् प॰ प॰ अवेवेक्-ग् । आ॰ प॰ अवेविक्त ।
लोट् प॰ प॰ वेवेक्तु । आ॰ प॰ वेविक्ताम् ।
विधि॰ प॰ प॰ वेविज्यात् । आ॰ प॰ वेविजीत ।

विष् लट् प॰ प॰ वेवेष्टि । आ॰ प॰ वेविष्टे ।
लङ् प॰ प॰ अवेवेट्-ड् । आ॰ प॰ अवेविष्ट ।
लोट् प॰ प॰ वेवेष्टु । आ॰ प॰ वेविष्टाम् ।
विधि॰ प॰ प॰ वेविष्यात् । आ॰ प॰ वेविषीत ।

j. जन जनने जुहो प॰ प॰ जन् to beget or produce.
जजन् + ति = जजन्ति ।
जजन् + तस् = जजातः । न् is replaced by आ – see below, जनसन॰– ॥

जनसनखनां सञ्झलोः ॥ ६ । ४ । ४२ ॥

Fully stated, जन-सन-खनाम् अङ्गस्य सनि झलि क्ङिति झलि च आत् ।

The final vowel of the bases जन्, सन् and खन् is replaced by आ followed by the affix सन् beginning with a झल् वर्ण (i. e. when it has not taken the augment इट् – this applies only to सन्) or a कित् or ङित् affix beginning with a झल् वर्ण. तस् is ङित् beginning with a झल् वर्ण.
जजन् + अति = जजन्+अति । The penultimate अ is elided – गमहन॰– ॥ ६ । ४ । ९८ ॥ (Chap. X)
= जज्न्+अति । न् is replaced by ञ् – स्तोः॰ – ॥
= जज्ञति । ज्+ञ् = ज्ञ ।

लट् – जजन्ति जजातः जज्ञति etc.
लङ् – अजजन् अजजाताम् अजज्ञुः etc.
लोट् – जजन्तु जजाताम् जज्ञतु etc.
विधि॰–जजन्यात्–जजायात् जजन्याताम्–जजायाताम् जजन्युः–जजायुः:etc. *

* ये विभाषा ॥ ६ । ४ । ४३ ॥ आत्वम् ।

3 The Passive and Impersonal construction.

The विकरण प्रत्यय यक् is added to all roots followed by आ० प० तिङ् endings to indicate the object or the action. The root-base becomes अकारान्त and the modifications for तिङ् affixes given in sec. 9 Chap. I apply.

हु – हूयते । अहूयत । हूयताम् । हूयेत । (अकृत्सार्व० – ॥ ७ । ४ । २५ ॥ II, 16)

ऋ – अर्यते । आर्यत । अर्यताम् । अर्येत । (गुणोऽर्ति० – ॥ ७ । ४ । २९ ॥ II, 16)

भृ – भ्रियते । अभ्रियत । भ्रियताम् । भ्रियेत । (रिङ्श० – ॥ ७ । ४ । २८ ॥ I, 13)

पॄ – पूर्यते ।अपूर्यत । पूर्यताम् । पूर्येत (उदोष्ठ्य० – ॥ ७ । १ । १०२ ॥)

दा – दीयते । अदीयत । दीयताम् । दीयेत । (घुमा० – ॥ ६ । ४ । ६६ ॥ II, 16)

Similarly धा – धीयते; मा – मीयते; ओहाक् – हीयते etc.

ओहाङ् गतौ, however, हायते ।

जन जनने – जन्यते or जायते (ये विभाषा ॥ ६ । ४ । ४३ ॥ II, 16)

4. Roots of the जुहोत्यादि class.

ऋ गतौ प० प० ऋ – to go.

With सम् (आ० प० अकर्मक)* to run together, to come into conflict, (प० प० सकर्मक) – to join together, to bring about; The causal is अर्पि § (समर्पि to present)

णिजिर् शौचपोषणयोः उ० प० निज् to wash or cleanse, to nourish.

With निर्-निर्णिज् to wash off.

डुदाञ् दाने उ० प० दा – to give.

With आ, आ० प० † – to receive, to seize; with अप & आ, (आ० प०) – to

---

* अर्तिश्रुदृशिभ्यश्चेति वक्तव्यम् ॥ (वा०)

Preceded by सम्, ऋ takes आ० प० affixes if it is used intransitively. पुगागमः णौ परे ।

§ अर्तिह्रीव्लीरीक्नुयीक्ष्माय्यातां पुङ्णौ ॥ ७ । ३ । ३६ ॥

† आङो दोऽनास्यविहरणे ॥ १ । ३ । २० ॥

Preceded by आङ्, दा takes आ० प० affixes provided the meaning is not ' opening the mouth ' – यतिः दण्डम् आदत्ते – The ascetic seizes the staff. But सिंहः मुखं व्याददाति – The lion opens his mouth.

आस्यविहरणसमानक्रियाया अपि प्रतिषेधो वक्तव्यः ॥ (वा०)

The exception अनास्यविहरणे applies also to an operation similar to the opening of the mouth.

चिकित्सकः विपादिकां व्याददाति – The physician opens the tumour.

नदी कूलं व्याददाति – The river breaks open the bank. (Contd.)

take away; with उप & आ (आ० प०) to accept; with वि & आ (उ० प०) to open; with उप – to add or grant; with प्र – to give away; with सम्– to bestow.

डुधाञ् धारणपोषणयोः उ० प० धा – to hold, to sustain, to place.

a. Preceded by उपसर्गs – with अपि or पि‡ – to shut, to conceal; with अभि – to set forth, to name; with अव - to deposit; with आ – to place; with उप – to place near, to yoke; with उप & आ – to put on, to take up; with नि – to deposit; with परि – to surround, to wear; with प्र and नि * to put down, to set (a gem), to turn or direct; with वि – to distribute, to perform etc.; with प्रति & वि – to dispose, to counteract, to remedy; with वि and अव - to interpose; with सम् – to join, to unite; with सम् & आ- to collect, to compose etc.; with सम् and नि to place near, to fix upon; with अति & सम् to overreach, to injure; with अनु and सम् to go after, to aim at, to deleberate; with अभि & सम् to hold togethe,r to fit etc.

b. Preceded by गति indeclinables- with अन्तर् § to conceal or hide; with तिरस् † – (तिरोधा) to disappear; with श्रत् ** (श्रद्धा) to put faith in.

पराङ्गकर्मकान्न निषेधः ॥ (वा०)

The exception अनाप्यविहरणे does not apply if reference is to पराङ्ग

व्याददते पिपीलिकाः पतङ्गस्य मुखम् – Ants open the mouth of the moth.

